म. ग्रं. सं. ठाणे
विषय कादंबरी
सं. क्र. 78208



# गिजा

REFBK-0010054

ग. बा. पळसुले

मराठी ग्रंथ संग्रहालय, ठाणे. स्थळप्रत.
अनुक्रम २४८८ वि: ०३१८४
नों: दि:

# अग्निजा

महाकवि–सावरकराणां कतिपयानां
पद्यानां संस्कृतानुवादः

अनुवादकः—डॉ. ग. बा. पळसुले,
एम्.ए., पीएच्.डी.

REFBK-0010054
REFBK-0010054

ग्रंथ संग्रहालय ठाणे
दा. क्र. १००५४

मूल्यम् रु. २

: प्रकाशक :
ग. बा. पळसुले
५९३ सदाशिव, पुणें २.

प्रथमावृत्तिः १९५८

सर्वे अधिकाराः प्रकाशकाधीनाः

: मुद्रक :
स. रा. सरदेसाई,
बी. ए., एल्एल्. बी.,
नवीन समर्थ विद्यालयाचा
'समर्थ भारत' छापखाना,
४१ बुधवार पेठ, पुणें २.

मराठी ग्रंथ संग्रहालय, ठाणे. स्थळप्रत.
अनुक्रम ४४६८ वि: ३/८८
क्रमांक ९४२८ नों: दि: २/३/५८

कृतज्ञतापूर्वकं समर्पितम्

मम पितुः पितृव्यपत्न्याः

# कै. सरस्वतीबाई

इत्यस्याः पावनस्मृतये

या हि मे विनयाधानाद् रक्षणाद् भरणाद् अपि ।
द्वितीया जननीवासीत् निष्कामा कर्मयोगिनी ॥

# पुरस्कार:

## ( १ )

वीर सावरकर यांच्या जीवनाचे अनेक पैलू आहेत. आणि त्या प्रत्येक अंगांत किंवा कार्यक्षेत्रांत त्यांनीं आपल्या तेजस्वी आणि उंच व्यक्तिमत्त्वाचा प्रभाव प्रगट केला आहे. इतक्या अनेकविध वैचारिक आणि कर्तबगारीच्या क्षेत्रांत उच्चांक गांठणारा दुसरा पुरुष निर्देशिणें कठीण आहे..

वीर सावरकर हे केवळ स्वातंत्र्यार्थ सशस्त्र क्रांतीचे संघटक पुढारी म्हणून चमकून अंदमानांतच इतर अनेक देशभक्तांप्रमाणें झिजून नाहींसे झाले असते किंवा परत येऊन निवृत्त जीवन कंठीत राहिले असते तरी त्यांना भारतीय स्वातंत्र्याच्या इतिहासांत अग्रस्थान राहिलें असतें.

बुद्धिवादी समाजसुधारक म्हणून वीर सावरकरांनीं जें विचारांचें आणि आचारांचें प्रवर्तन केलें तेवढेंच त्यांनीं केलें असतें तरी सुधारकाग्रणी म्हणून त्यांचा पिढ्यानुपिढ्या गौरव राहिला असता.

हिंदुत्वाची नवी व्यापक कल्पना सांगोपांग मांडून हिंदुराष्ट्रवादाचा राजकीय क्षेत्रांत प्रभाव पाडणारे हिंदुमहासभेचे क्रमानें सहा वेळां झालेले अध्यक्ष ह्या नात्यानेंहि त्यांचें स्थान असाधारण राहिलें असतें.

त्यांची भाषाशुद्धी, लिपिशुद्धी, निबंधलेखन व गद्य ग्रंथलेखन येवढेंच त्यांच्या हातून झालें असतें तरी मराठी वाङ्मयाच्या इतिहासांत ते चिर-स्मरणीय झाले असते.

त्याचप्रमाणें वीर सावरकरांची काव्यरचना तेवढी उरून त्यांच्या इतर आयुष्यावर जरी क्षणभर विस्मृतीचें झांकण टाकलें तरी ते एक अग्रगण्य कवी म्हणून गणनीय ठरतील.

वीर सावरकर यांच्या काव्याचें स्वरूपहि विविध आहे. जुन्या मराठी काव्याच्या अनुकरणानें लिहिलेल्या प्रासंगिक कविता, देशभक्तिपर पद्यें, भावना उचंबळून व्यक्त झालेलें अभिजात कवित्व, गूढ चिंतनाच्या उंच

भराऱ्या मारणारें त्यांचें तत्त्वज्ञानात्मक काव्य, हिंदुजातीच्या अभिमानानें रसरसलेले काव्योद्गार, आणि कमला काव्यासारखें अपुरें राहिलेलें महाकाव्य, ह्या सर्वांचा साकल्यानें विचार केला तर कवि सावरकर श्रेष्ठ म्हणावे, का देशभक्त सावरकर श्रेष्ठ ठरवावे, का सुधारक सावरकर त्याहून वरचढ मानावे अशा घोटाळ्यांतच पडावें लागतें.

या काव्यसंपदेमधील स्फुट काव्यें तेवढींच संस्कृत रूप देऊन त्यांच्या अमृतमहोत्सव प्रसंगानें मांडण्याचें श्री. डॉ. ग. बा. पळसुले यांनीं मनांत आणलें याचें कारण त्यांचें सावरकर-प्रेम आणि संस्कृतभक्ति यांचा संयोग हेंच होय. आजवर अनेक संस्कृत काव्यांचीं मराठी रूपांतरें झालीं आहेत. पण एकाच कवीच्या इतक्या मराठी काव्यांचें संस्कृतांत रूपांतर झाल्याचें उदाहरणहि अपूर्वच म्हटलें पाहिजे.

ह्या कवितांपैकीं कांहीं बंदीगृहांतील नऊ पावलें रुंदीच्या कोठडींत व्यायामार्थ येरझाऱ्या करतांना रचून मुखोद्गत केलेल्या आहेत, कांहीं अंदमानाच्या ‘ अंधेरी ’मध्यें खिळ्यांनीं भिंतीवर लिहून इतरांकडून पाठ करून घेतलेल्या आहेत; कांहीं आधीं सुटणाऱ्या बंद्यांच्या पाठांतराचे द्वारें बाहेर पडून सावरकर बंदींतच असतां टोपण नांवानें प्रसिद्ध झाल्या आहेत, कांहीं जीवनाचा अंत समीप आल्याचें दिसत असतां किंवा पुनः मातृभूमीस परत जाण्याची आशा उरली नसतां पाठवलेल्या संदेशासारख्या आहेत. कवीच्या जीवनसंग्रामाशीं इतकें सातत्यानें निगडित झालेलें काव्य दुसरें क्वचितच आढळेल.

वीर सावरकरांच्या मराठी कवितांमधील कांहीं कडवीं मुळांतच संस्कृत आहेत. तसेंच त्यांनीं थोडक्यांत एकाद्या प्रतिपाद्य विषयाची व्याख्या रूढ करण्याचें साधन म्हणून संस्कृत श्लोकांचें साधन अनेक प्रसंगीं हाताळलें आहे. “आसिन्धु-सिन्धुपर्यन्ता यस्य भारतभूमिका” इत्यादि हिंदुत्वासंबंधाची त्यांची व्याख्या प्रसिद्ध आहे. तसेंच ‘राष्ट्रस्वतन्त्रता ध्येयं यथासाध्यं च साधनम् । अभ्युत्थानाय हिन्दूनाम् अयं पक्षः प्रवर्तितः ।। हा हिंदुत्वनिष्ठ पक्षाचें

थोडक्यांत स्वरूप मांडणारा त्यांचा संस्कृत श्लोक किंवा "जात्युच्छेदनार्थं सहभोजनं करिष्ये" हा संकल्प, तसेंच मराठी भाषेमधून निष्कारण घुसलेले परके शब्द काढून टाकून "भाषाशुद्धी" करतांना त्यांनीं आदरलेले संस्कृत पर्याय शब्द यांवरून त्यांचें संस्कृत भाषेवरील नितान्त प्रेम व्यक्त होतें. यामुळें त्यांचें बहुतेक स्फुट काव्य संस्कृत रूप देऊन 'अग्निजा' या बोधक नांवानें पुढें आणण्याच्या डॉ. पळसुले यांच्या उपक्रमामुळें त्यांना आनंदच वाटला असून तो त्यांनीं व्यक्तहि केलेला आहे. तशाच प्रकारें डॉ. पळसुले यांच्या उपक्रमाविषयीं आदर संस्कृतभक्तांना आणि सावरकर-भक्तांनाहि वाटेल, असा मला विश्वास वाटतो. ही अग्निजा म्हणजे ठिणगी वातावरणांत विझून न जातां अनेकांना चेतना देणारी व्हावी अशी डॉ. पळसुले यांची जी इच्छा असणार ती पूर्ण होवो असें मी इच्छितों.

डॉ. पळसुले यांच्या संपादकत्वानें निघणाऱ्या 'भारतवाणी' ह्या संस्कृत पाक्षिकामधून यांपैकीं कांहीं कवितांचीं संस्कृत रूपांतरें प्रसिद्धहि झालीं आहेत. ह्या पुस्तकामध्येंहि मूळ मराठी कविता एका अंगाला व संस्कृत रूपांतर दुसऱ्या अंगाला छापलें असल्यामुळें संस्कृत भाषाभ्यासी विद्यार्थ्यांनाहि संस्कृत भाषेचें ज्ञान घटविण्यास तें साधनीभूत होईल. "फेअरवेल" ह्या सावरकरांच्या इंग्रजी गद्यकाव्याचेंहि संस्कृतांतील रूपांतर मूळ इंग्रजीसह या पुस्तकांत घातलेलें आहे.

कसेंहि झालें तरी हें प्रकाशन म्हणजे स्वतःच्या आवडीचें पूरण अशाच स्वरूपाचें राहणार. मर्यादित संख्येनें या प्रति छापल्या तरी तेवढा व्यय भरून निघण्याइतके ग्राहक मिळवणें हें देखील सहज घडून येणारें नाहीं. तशा आवडीचे ग्राहक पुढें यावेत आणि डॉ. पळसुले यांचा होणारा व्यय पुष्कळां-शांनीं भरून निघावा यासाठींहि त्यांना आणि इतर सावरकरप्रेमी आणि संस्कृतप्रेमी लोकांना प्रयत्नच करावयास पाहिजे. तो होऊन या स्तुत्य उपक्रमाचें सार्थक होवो अशी इच्छा प्रगट करून हे प्रास्ताविक चार शब्द पुरे करतों.

ग. वि. केतकर

स्वातन्त्र्यवीराः श्रीमन्तो वि. दा. सावरकर-महाभागाः भारतीयक्रान्ति-कारकाणाम् अग्रेसराः। भारतीय-स्वातन्त्र्यस्थण्डिले तैः स्वजीवितम् आहुती-कृतम्। सोढः भीषणः देहदण्डः। मृत्युपर्यवसायिनोऽपि च बहवः प्रयत्नाः स्वातन्त्र्यार्थं कृताः। ते अत्युग्रं कारावासं बहुतिथं कालं सोढ्वा विमोचिताः आसन्। तस्मात् ऊर्ध्वं तैः मातृभूमिहितार्थं नैके उपायाः अङ्गीकृताः। भाषाशुद्धिः, समाजकारणम्, हिन्दुत्वराष्ट्रवादः इत्यादीनि बहूनि खलु रूपाणि तेषां प्रयत्नानाम्। ते यथा राजकारणे निर्भयाः तथा समाजसंघटनविषये कुशलाः कार्यकारिणः। ऐतिह्ये पण्डिताः वक्तृत्वे च परमपटवः। एवं विविधस्वरूपं तेषां कर्तृत्वम्। तन्मध्ये तेषां प्रतिभानशालि-काव्यकौशलम् प्रथतेतमाम्। अथवा तेषां प्रतिभा निसर्गसिद्धा एव। ते यत् किमपि उच्चारयन्तु विचारयन्तु आचरन्तु वा तेषां वाङ्मनःकर्मणाम् काव्यप्रतिभा प्रेरिका आधारभूता च।

तैः महाराष्ट्र-भाषायां बहुविधं काव्यम्, त्रीणि च नाटकानि विरचितानि। ते न केवलम् कवयः किन्तु महाकवयः अपि वर्तन्ते। एतादृशाः महा-महिमशालिनः सावरकराः अस्मिन् मासि स्ववयसः पञ्चसप्ततिं वर्षाणि समापयन्ति। तेषां सभाजनार्थम् अमृतमहोत्सवः महता समारोहेण महाराष्ट्रे क्रियते। तदर्थं मम सुहृद्वर्यैः डॉ. पळसुले महाभागैः 'भारतवाणी' प्रधान-सम्पादकैः, सावरकराणाम् काव्यमध्यात् केषांचन स्फुटकाव्यानाम् गीर्वाण-भाषायाम् अनुवादो विहितो वर्तते। अस्य गीर्वाणभाषारूपस्य काव्यसंग्रहस्य तैः "अग्निजा" इति अन्वर्थम् नाम कृतम्। अग्निजा द्रौपदी याज्ञसेनी यथा होमज्वालायाः विनिर्गता तथा तेजस्विनी सावरकर-कवितावधूः अपि भारतीय-स्वातन्त्र्यार्थं प्रज्वालितायाः होमज्वालायाः निष्पन्ना।

डॉ. पळसुले महाभागानां संस्कृतानुवादः मूलार्थदर्शी, सरलः, सुश्लिष्टश्च।

संस्कृतस्य सहजम् अकृत्रिमं च लालित्यं प्रदर्शयन्ति, बहूनि अनुवादपद्यानि स्वतन्त्रतया गीर्वाणभाषायां विरचितानीव भान्ति तानि यथा—

५. सान्त्वनम्ः—श्लोकौ ४, ५.

९. द्वितीया मूर्तिः—पङ्क्तयः ९०–१०० ( अनुवाद )

१०. पुष्पवाटिकाः— श्लोकाः १–१०.

सावरकरकाव्यं–तस्य अर्थगौरवाद् वा अन्यस्मादपि वा कारणात्–क्वचित् क्वचित् क्लिष्टमिव अवभासते। सा क्लिष्टता अनुवादस्य प्रसादगुणमाहात्म्यात् निरस्ता दृश्यते। तथाच मूल-महाराष्ट्र-भाषायाः नैके स्वभावविशेषाः वाग्विशेषाः, आभाणकादयश्च अनुवादकैः महता कौशलेन तथा परिवर्तिता यथा ते संस्कृतमूलस्वभाव-विशेषतां भजन्ते।

अनेन अनुवादेन सावरकर-कवितायाः तेजस्वि अन्तरङ्गं, अन्यभाषाभाषिणाम् अपि सम्यक्तया सुगमं भवेत्। अद्यावधि सावरकर-काव्यकीर्तिः केवलं महाराष्ट्रमण्डल-परिमिता आसीत्। अधुना तु अनेन संस्कृतानुवादेन निखिल-भारतव्यापि-संस्कृतानुग्रहवशात् सा निखिल-भारत-गामिनी स्यात्। एतदर्थं अनुवादकाः डॉ. पळसुले महाभागाः भारतीयानां वाचकमहाभागानां धन्यवादान् अर्हन्ति। इयं सुभगा अनुवादकृतिः संस्कृतवाचकैः, धनिकैः ग्रन्थालयाधिकारिभिः उदारतया उत्तेजिता भवतु इत्याशास्य अत्रैव विरमामि।

योगकुञ्ज, चिमणबाग<br>
टिळकपथ, पुणें २<br>
२३।५।५८

के. ना. वाटवे

# प्रास्ताविकम्

श्रीमतां स्वातन्त्र्यवीराणां विनायक दामोदर सावरकर इत्येतेषाम् अस्मिन् अमृतमहोत्सवदिने अद्य पूर्वसंकल्पानुसारं तेषां कतिपयानां कवितानां संस्कृतानुवादं वाचकानां हस्ते समर्पयता मया कोऽपि अनिर्वचनीयः आनन्दः अनुभूयते ।

मराठी-सदृश्यां देश्यभाषायां विरचितस्य वाङ्मयस्य संस्कृतसदृश्यां विरल-प्रचारायां पण्डितमात्रगम्यायां पुरातनभाषायाम् अनुवादकरणं नाम कोऽयम् अव्यापारेषु व्यापारः इति कदाचित् केषांचित् मतिः स्यात् । संस्कृत-ग्रन्थानां हि वर्तमानभाषासु अनुवादाः क्रियन्ते । को नाम हेतुः एतद्-विपरीत-क्रमाश्रयणे इति कदाचित् केचित् पृच्छेयुः । तत्र इदं समाधानं यत् सावरकराणां काव्यं मराठी-रूपायाम् एकस्यां प्रादेशिकभाषायां प्रणीतत्वात् महाराष्ट्रे एव लब्धप्रचारं वर्तते । महाराष्ट्राद् अन्यत्र शेष-भारते क्वचिदेव कश्चित् कवि-सावरकरान् जानाति । सावरकराणां व्यक्तित्वस्य इदम् अङ्गम् अद्ययावद् अजानन्तः मराठीतर-भाषाभाषका तेन सह परिचिता भवेयुः इत्येतदर्थः अयं मे प्रयासः ।

ननु तर्हि आङ्ग्लभाषायां हिन्दीभाषायां वा अनुवादः कर्तव्यः, स एव संस्कृतापेक्षया दूरतरगामी स्यात् अधिकतरजनैश्च पठितो भवेत् । सत्यम् । तदपि इष्टमेव अस्माकम् । अन्यास्वपि देश्यभाषासु सावरकराणां काव्यस्य अनुवादः अवश्यकरणीयः तत्तद्-भाषाप्रभुभिः । स्वागतार्हमेव तत् । मया तु संस्कृतैकनिष्ठेन यत् संस्कृतम् एव आश्रितं तत्र अस्ति कश्चिद् हेतुः । स च संस्कृतस्य प्रसारः । का भाषा राष्ट्रभाषा भवतु, संस्कृतं राष्ट्रभाषा भवेद् वा न वा इत्यादीन् वादग्रस्तान् विषयान् अप्रविश्यापि एतावत् सनिश्चयं वक्तुं शक्यम्, यत् भिन्नभिन्न-भाषाभाषिकेषु दृश्यमानं मनोमालिन्यं यदि दूरीकरणीयम्, तेषां मिथः-कलहः यदि शान्तिं नेयः, तत्तद्-भाषा-

भाषिणां सर्वेषामपि भारतीयानां चेतसि एकता यदि निर्मातव्या संवर्धनीया च, भारतीय-एकताभिभाविनी प्रान्तीयता-विषवल्ली यदि समूलम् उच्छेद-नीया तर्हि अवश्यं अधिकाधिकैः जनैः संस्कृतस्य परिचयः कर्तव्यः प्रयोगश्च करणीयः। भिन्नभाषाभाषिकेषु तेषु तेषु भारतीयेषु ये ये समानांशाः तेषां हेतुतः कृतेन पोषणवर्धनादिनैव भारतीयायाः एकतायाः संवर्धनं स्यात्, नान्यथा। संस्कृतभाषा च निखिलभारतस्य—न कस्यापि प्रदेशविशेषस्य—पैतृकधनरूपा सती भवति ईदृशः प्रधानतमः साधारणांशः अतश्च सविशेषा आवश्यकता तस्याः अधिकाधिकस्य प्रसारस्य, लोकप्रियीकरणस्य, व्यवहारे च प्रयोगस्य।

अन्यदपि इदमत्र अवधेयम्। जनानां संस्कृताभिमुखता यदि ईप्सिता, तर्हि संस्कृतेनापि जनाभिमुखेन भवितव्यम्। अतः संस्कृतभाषायाः सुबोधी-करणम् इव नूतनीकरणं संपन्नीकरणं च इत्युभयम् अपि अपेक्ष्यते। यस्यां यस्यां भाषायां यद् यत् शोभनं वर्तते तत् तत् संस्कृते यथा संगृहीतं भवेत् तथा प्रयत्नाः करणीयाः। सावरकराणां काव्यम् अपि तादृशमेव एकं 'श्रीमदू-र्जितमेव वा' सत्त्वं भवति, यद् यस्यां कस्यां भाषायाम् अपि अनूदितं सत् तस्या भूषणं भविष्यति। अतः अवश्यम् अपेक्षते ईदृशं काव्यरत्नं संस्कृत-भाषायाः अपि भाण्डागारे अन्तर्भावम्। अस्ति च किंचित् सौकर्यं सावरकरकाव्यस्य संस्कृतानुवादकरणे। यतः संस्कृत-शब्दप्रचुरा हि सावरकराणां कविता, कालिदासादि-काव्यानां तैः कृत-भूरि-पठनत्वात्। अस्ति च सावरकराणां हृदये काचित् प्रगाढा भक्तिः संस्कृतभाषाया उपरि अतः नात्र किमपि चित्रं यदि संस्कृतनिष्ठत्वात् तेषां काव्यम् इतरेषां कवीनां काव्यापेक्षया संस्कृतस्य निकटतरं भवति। कुत्रचित् न केवलं शब्दविशेषाः, किं तु समग्रा पङ्क्तिरपि संस्कृतमयी दृश्यते। कुत्रचित् मराठी-प्रत्ययस्य स्थाने संस्कृत-प्रत्ययस्य निवेशनमात्रम् अनुवादाय पर्याप्तम्। ग्रन्थ-गौरव-भिया नात्र उल्लिख्यन्ते उदाहरणानि। अत्र अनुवादेन सह

मूलकाव्यस्यापि पार्श्वपार्श्वे उपस्थापितत्वात् जिज्ञासूनां कृते तादृशोदाहरणानां प्रत्यक्षीकरणं सुशकम् एव।

अत्र अनुवादे यादृशं संस्कृतं प्रयुक्तं तद्विषयेऽपि किंचिद् वक्तव्यम्। सुबोधतायाः संपादनं मम प्रथमम् उद्दिष्टम् आसीत्। एतदर्थं परिहृतम् अनावश्यकं संधिसमासम्। ये संधयः स्वाभाविकतया प्रतीयन्ते ते अवश्यं कृताः; तत्रापि ध्वनिविकाररूपे कार्ये कृतेऽपि संबद्ध-पद-द्वयम् यथाशक्यं विभक्तमेव लिखितम्, न तु संयुक्तम्। ध्वन्यन्तर-संनिकर्षेण ध्वन्यन्तरस्य विकारापन्नता हि संधिहृदयम्। संयुक्तलेखनं तु गौणम्। अत्रानुसृतायाः परिपाट्याः आश्रयणेन यथाशक्यं शास्त्रपालनम् अपि भवति, संस्कृतेन सह अल्पपरिचितानां वाचकानां सौकर्यम् अपि भवति। समासविषये एतद् वक्तुम् आवश्यकं यत् कयाचित् मात्रया समासा नाम संस्कृतभाषाया भूषणान्येव। प्रसङ्गविशेषेषु च सर्वथा अशक्या भवति यथावद् अर्थाभिव्यक्तिः, अनाश्रित्य समासम्। अतिरेकस्तु वर्जनीयः, विशेषतश्च अनावश्यकानां समासानाम्।

वृत्तविषये यानि संस्कृतवृत्तानि तानि तावत् तथैव रक्षितान्येव। क्वचित् महाराष्ट्रियाणि मूलवृत्तान्यपि तथैव अनुवादे अपरिवर्त्य प्रयुक्तानि। वैनायक-वृत्ते रचिते द्वे पद्ये, blank-verse सदृशे स्वैर-वृत्ते च रचितम् एकम् आङ्ग्लभाषा-ग्रथितं पद्यम् इति त्रीणि तु मया मूलसाधर्म्यात् स्वैरमेव गद्यप्रायायाम् मुक्तछन्दोबन्धनायां रचनायां परिवर्तितानि। अस्ति एतादृश्यां रचनायाम् अपि कश्चित् शोभाविशेषः। विशेषतः संस्कृतस्य लोकप्रियीकरणार्थम् एतादृशाः नूतना नूतनाः प्रकाराः तत्र अवश्यं प्रचारणीयाः।

विलोभनीयं सदपि सावरकर-काव्यं न सुखावबोधम्। नारिकेलपाक-सदृशं तत्, न द्राक्षापाक-सदृशम्। एवं सति एकार्थस्य अपि क्लिष्टपदस्य दुरूहकल्पनाया वा स्पष्टीकरणे यदि अनुवादस्य अस्य उपयोगः स्यात् तर्हि तावन्मात्रेणापि निजप्रयत्नानां साफल्यम् मया गणयिष्यते।

* * *

अस्य पुस्तकस्य प्रकाशने यैर्यैर् मम साहाय्यम् आचरितं तेषां तेषाम् अत्र कृतज्ञतापूर्वको निर्देशः अवश्यं कर्तव्यः। मम मित्रोत्तमयोः डॉ. म. त्र्यं. सहस्रबुद्धे, डॉ. व. ग. राहूरकर च इत्यनयोः, तथा मम श्वश्र्वाः सौ. शान्ताबाई गोखले इत्यस्याः—त्रयाणामपि सावरकराभिमानिनां संस्कृताभिवृद्धौ च बद्धादराणां—सर्वप्रकारकं साहाय्यं प्रोत्साहनं चेन् नाभविष्यत्, ग्रन्थस्य अस्य प्रकाशनमपि सर्वथा असंभवमेव अभविष्यत्। अत्र प्रकाशितानां मध्ये केचन अनुवादाः प्रागेव 'एकता' मासिके प्राकाश्यं गताः सन्ति। येषां सहकार्यवशात् एते अनुवादाः वाचकानां पुरतः प्रथममेव आविर्भवितुं प्राभवंस् ते डॉ. राहूरकराः पुनरपि धन्यवादार्हाः। यैश्च कार्यान्तरशत-व्यापृतैरपि सावरकर-निष्ठत्वात् तरुणकार्यकर्तॄणां प्रोत्साहनशीलतया च अस्य ग्रन्थस्य पुरस्कारो लिखितः ते 'तरुण-भारत'स्य संपादकाः श्री. ग. वि. केतकर-महाशयाः, तथा संस्कृतैकनिष्ठतया अविगणय्य निजं प्रकृतेर् अस्वास्थ्यं यैः अन्यः पुरस्कारो लिखितः ते डॉ. के. ना. वाटवे-महाशयाः इत्युभावपि धन्यवादार्हौ। चित्रकारः श्री. सि. पु. थत्ते तथा प्रख्यात-सुभग-मुद्रणस्य समर्थ-भारत-मुद्रणालयस्य सेवकवर्गः इत्येतौ अपि न विस्मरणीयौ।

अन्ततश्च यान् प्रति कृतज्ञता प्रकटीकरणीया ते स्वयं श्री. विनायकरायसावरकराः एव। बाल-कौतुक-धिया यत् तैः मम कृतेः गुणग्रहणं कृतम्, यच्च कृतं व्यवहारानुगुणं मार्गदर्शनं, यच्च विना किमपि बन्धनम् एतत्-प्रकाशनकृते सानन्दं दत्ता अनुज्ञा तदर्थं कृतज्ञतावनतेन शिरसा तेषामपि उपकारभारम् ऊढ्वा विरमामि।

पुणें
२८–५–५८

ग. बा. पळसुले

# अनुक्रमणिका


| मूलम् | पृ. | | अनुवादः | पृ. |
|---|---|---|---|---|
| १ स्वतंत्रतेचें स्तोत्र | २ | : | स्वतन्त्रता-स्तोत्रम् | ३ |
| २ तारकांस पाहून | ६ | : | तारकादर्शनोत्तरम् | ७ |
| ३ प्रभाकरास | १४ | : | प्रभाकरं प्रति | १५ |
| ४ सागरास | १८ | : | सागराकुलाः प्राणा मे | १९ |
| ५ सांत्वन | २२ | : | सान्त्वनम् | २३ |
| ६ माझें मृत्युपत्र | २६ | : | मदीयं निर्याणपत्रम् | २७ |
| ७ FAREWELL | ३६ | : | तावत्कालपर्यन्तं 'नमस्ते' | ३७ |
| ८ आत्मबल | ४० | : | आत्मबलम् | ४१ |
| ९ मूर्ति दुजी ती | ४२ | : | द्वितीया मूर्तिः | ४३ |
| १० फुलबाग | ५८ | : | पुष्पवाटिका | ५९ |
| ११ मरणोन्मुख शय्येवर | ७० | : | मरणोन्मुख-शय्यायाम् | ७१ |
| १२ जगन्नाथाचा रथोत्सव | ९० | : | जगन्नाथस्य रथोत्सवः | ९१ |

परिशिष्टम्

| | |
|---|---|
| १ वीराय तस्मै नमः | ९४ |
| २ प्रवहतां संस्कृत-मन्दाकिनी | ९५ |



वीरं विनायकं वन्दे सावरकर-कुलोद्भवम्।
दिव्य-प्रतिभया युक्तं कवीनां हि महाकविम्॥

# अ ग्नि जा

# १. स्वतन्त्रतेचें स्तोत्र

जयोऽस्तु ते श्रीमहन्मंगले ! शिवास्पदे शुभदे
स्वतंत्रते भगवति ! त्वामहं यशोयुतां वंदे ॥ ध्रु. ॥

राष्ट्राचें चैतन्य मूर्त तूं नीति-संपदांची
स्वतंत्रते भगवति ! श्रीमती राज्ञी तूं त्यांची

परवशतेच्या नभांत तूंची आकाशीं होशी
स्वतंत्रते भगवती ! चांदणी चमचम लखलखशी

गालावरच्या कुसुमीं किंवा कुसुमांच्या गालीं
स्वतंत्रते भगवती ! तूंच जी विलसतसे लाली

तूं सूर्याचें तेज, उदधिचें गांभीर्यहि तूंची
स्वतंत्रते भगवती ! अन्यथा ग्रहण नष्ट तेंची

मोक्ष मुक्ति हीं तुझींच रूपें तुलाच वेदांती
स्वतंत्रते भगवती ! योगिजन परब्रह्म वदती

जें जें उत्तम उदात्त उन्नत महन्मधुर तें तें
स्वतंत्रते भगवती ! सर्व तव सहचारी होतें

हे अधम-रक्त-रंजिते ! सुजन-पूजिते । श्रीस्वतंत्रते
तुजसाठिं मरण तें जनन
तुजवीण जनन तें मरण
तुज सकल चराचर शरण

भरतभूमिला दृढालिंगना कधिं देशिल वरदे
स्वतंत्रते भगवति ! त्वामहं यशोयुतां वंदे [१]

१००५८

# १. स्वतन्त्रता-स्तोत्रम्

जयोऽस्तु ते श्रीमहामङ्गले शिवास्पदे शुभदे।
स्वतन्त्रते ! भगवति, त्वाम् अहं यशोयुतां वन्दे ॥

चैतन्यं राष्ट्रस्य मूर्तिमत् त्वमेव हे देवि।
स्वतन्त्रते ! भगवति, त्वमसि नीतिसंपदां राज्ञी ॥

परवशतायां नभःप्राङ्गणे त्वमेव संपद्यसे।
स्वतन्त्रते ! भगवति, स्फूर्तिदं ज्योतिस् तरलप्रभम् ॥

कपोल-कुसुमे ललितकोमले कुसुम-कपोले वा।
स्वतन्त्रते ! भगवति, द्योतते त्वमेव रागो यः ॥

सवितुस् तेजस् त्वमेव, सिन्धोस् त्वमेव गाम्भीर्यम्।
स्वतन्त्रते ! भगवति, ह्यन्यथा नष्टं स्याद् ग्रहणम् ॥

मोक्षो मुक्तिर् निर्वाणं वा तवैव रूपाणि।
परब्रह्म योगिनां त्वमेव स्वतन्त्रते ! देवि ॥

यद्यदुत्तमं मधुरमुदात्तं सुमहदुन्नतं वा।
तत् तद् देवि स्वतन्त्रते ! ते गच्छति सहचारिताम् ॥

हे अधम-रक्त-रञ्जिते। सुजन-पूजिते। श्रीस्वतन्त्रते।

यत् त्वदर्थ-मरणं, जननम्
त्वां विना जन्म, तन् मरणम्
त्वं चराचराणां शरणम्

दृढालिङ्गिता त्वया भरतभूः कदा भवेद् वरदे ?
स्वतन्त्रते ! भगवति त्वामहं यशोयुतां वन्दे ॥ [ १ ]

हिमालयाच्या हिमसौधाचा लोभ शंकराला
क्रीडा तेथें करण्याचा कां तुला वीट आला ?

होय आरसा अप्सरसांना सरसें करण्याला
सुधाधवल जान्हवीस्रोत तो कां गे त्वां त्यजिला ?

स्वतंत्रते ! या सुवर्णभूमित कमती काय तुला ?
कोहिनूरचें पुष्प रोज घे ताजें वेणीला
ही सकल-श्री-संयुता । आमुची माता । भारती असतां
कां तुवा ढकलुनी दिधली ?
पूर्वीची ममता सरली
परक्यांची दासी झाली

जीव तळमळे, कां तूं त्यजिलें ? याचें उत्तर दे
स्वतंत्रते भगवति ! त्वामहं यशोयुतां वंदे

पुणे १९०२.

यत्र हिमाद्रेर् हिमसौधेषु शिवोऽपि लुब्धोऽभूत् ।
क्रीडासक्तिस् तत्र देवि ते मन्दीभूता कथम् ॥

प्रसाधनार्थं सुराङ्गनानां गतस्य दर्पणताम् ।
सुधाधवल-जाह्नवीस्रोतसः किं त्यागो विहितः ? ॥

स्वतन्त्रते ऽस्यां सुवर्णभूमौ अप्राप्यं किं तव ?
नवं नवं कोहिनूर-पुष्पं कुरु केशे प्रत्यहम् ॥
इयं सकल-श्री-संयुता । अस्माकं भारतमाता

किं त्वया दूर-सारिता ?
किं नष्टा सा-ऽऽत्मीयता ?
दासीभावं यद् गता

आर्तो ऽहं, किं त्यागकारणं ? ब्रूहि त्वं शुभदे ।
स्वतन्त्रते ! भगवति, त्वामहं यशोयुतां वन्दे ॥

# २. तारकांस पाहून–



सुनील नभ हें, सुंदर नभ हें, नभ हें अतल अहा
सुनील सागर, सुंदर सागर, सागर अतलचि हा
नक्षत्रांहीं तारांकित हें नभ चमचम हांसे
प्रतिबिंबांहीं तसा सागरहि तारांकित भासे
नुमजे लागे कुठें नभ कुठें जलसीमा होई
नभांत जल तें, जलांत नभ तें संगमुनी जाई
खरा कोणता सागर यांतुनि वरती की खालीं
खरें तसें आकाश कोणतें, गुंग मती झाली
आकाशींचे तारे सागरिं प्रतिबिंबित होती
किंवा आकाशीं हे विंबति सागरिंचे मोती
किंवा आकाशचि हें सगळें कीं, सागर सगळा
भवसागर बोलती पुराणीं प्रथित ऋषी ज्याला

* * *

## २. तारकादर्शनोत्तरम्

[ १९०६ ख्रिस्ताब्दे 'बॅरिस्टर' पदवीम् अधिगन्तुं भारतं विहाय आङ्ग्लभूमिं प्रति प्रस्थिताः श्री. सावरकराः। समुद्रमार्गेण गच्छतां तेषामपि मनः प्रथमवारं त्यक्तनिजगृहाणाम् अन्येषां पथिकानाम् इव प्रियजनानां स्मरणेन पर्याकुलं भवति स्म। तदानीं मनोविनोदनार्थं रात्रौ इतस्ततः नौतले संचरतां तेषां तारकादर्शनेन इत्थं कविता स्फुरिता। ]

सुनीलमाकाशमिदम् अतलं सुन्दरं यथा।
सुनीलः सागरश् चापि अतलः सुन्दरस् तथा॥

स्फुरद्-हास्यं यथा भाति एतत् तारकितं नभः।
सागरोऽपि तथा भाति प्रतिबिम्बिततारकः॥

न लक्ष्यो नभसः प्रान्तः सीमान्तो जलधेस् तथा।
उभयं ह्युभयोन्मिश्रं नभस्यापो नभोऽम्बुनि॥

कतरस् तत्त्वतः सिन्धुर् उपरिष्टोऽथ निम्नगः।
कतरद् वास्तवाकाशम् इति मुह्यति मानसम्॥

किं तारा गगनाधाराः सागरे प्रतिबिम्बिताः।
समुद्रान्तर्गता मुक्ता आकाशे किमु बिम्बिताः॥

अथ वा सर्वमेवेदम् आकाशं, सागरोऽथ वा।
भवसागर इत्युक्तः पुराणे मुनिसत्तमैः॥

*   *   *

हे चांदणि ! सुखशीतल गमसी तशीच असशीना
आगचि लागो लोळ आगिचा तुजसी वदत्यांना
विमल विरल मेघांची दुलई ओढुनि निजलीसे
अशा अप्सरेचिया अनावृत वदनासम विलसे
आल्हादक किति चंद्रबिंब हें नंदसुधा झरतें
फुटो भिंग तें भिकार त्या जें मसणासम करतें
चंद्र चांदण्या असेंच अंतर मापुनि देवानें
खचल्या नभिं नी नयनीं कांचा सुललित बेतानें
त्याचें रिझवो रूप जना कीं आल्हादक कोळें
फुटोत ते त्या विद्रुप करिते दुर्बिणिचे डोळे

* * *

कथिति ज्योतिषी तसे आजिचे लोळ कुणी तारे
असतिल दुसरे, नव्हेत हे, हे अमृत-बिंदु सारे !
कीं जैं असुरां-सुरांमधें क्षीराब्धि-मथनकालीं
अमृत-कलश वरि येतां ओढाताण सबळ झाली
ओढाताणित इतस्तत: त्या अमृत-बिंदु गळले
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले

कीं बघुनी अप्सरो-गणें हीं वसुधेवरि खालीं
चमेलि, जाई, जुई, मोगरा मालतिही फुलली,
त्यांच्या नंदनवनिंहि असावीं ऐशीं काम्य फुलें
यास्तव पेरुनि देति अप्सरा हास्य नभीं अपुलें
हास्यलते सुरसुहासिनींच्या आलीं ऋतुंत फुलें
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले

थवे काजव्यांचे कीं नंदनवनिंच्या चकचकले
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले

सुखा च शीतला भासि, कच्चित् स्यास् तारके! तथा
मन्वाना अग्निगोलं त्वां चुल्लीं गच्छन्तु ते जनाः॥
अनावृतमुखं यद्वत् कस्याश्चिद् दिव्ययोषितः।
प्रावारीकृत्य सुषाया जलदान् विरलान् शुचीन्॥
तद्वद् आह्लादकं चन्द्रं वमन्तं मधुरां सुधाम्।
शतधा दीर्यतां काचः श्मशाने परिवर्तयन्॥
अनुरूपान्तरं मित्वा विधात्रा विश्वकर्मणा।
तारका निहिता नूनम् आकाशे नयनेषु च॥
चन्द्रतारकशोभाश्च तोषयन्तु जनान् सुखाः।
दीर्यतां दूरवीक्षाक्षं वैरूप्यापादकं तयोः॥

* * *

अग्निगोलान् इमे केचित्, तारका इति चापरे।
मन्यन्ते, किं तु ते ऽन्ये स्युर्, नैते, एते सुधालवाः॥
अमृतेन पुरा पूर्णम् उत्थितं सिन्धुमन्थने।
कलशं कर्षयामासुर् उभये देवदानवाः॥
छिद्यमाने द्विधा कुम्भे ऽकीर्यन्तामृतबिन्दवः।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः॥

पृथिव्याम् अथ वा दृष्ट्वा प्रफुल्ला विविधा लताः।
यूथिका-मल्लिका-जाती-मालतीप्रमुखास् तदा॥
नन्दनेऽपि निजोद्याने तादृशीं कुसुमश्रियम्।
वाञ्छन्त्यो ऽप्सरसो बीजम् अवपन् हसितात्मकम्॥
सुरस्त्रीहास्यवल्ली सा अधत्त कुसुमोद्गमम्।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः॥

खद्योत-निवहा यद्वा द्योतन्ते नन्दने वने।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः॥

सुनील शालूवरि मायेच्या लकलकती टिकले
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले
सुवर्ण-गौरा-गौरी श्रीहर लीलारत झाले
थाप पडे तों द्वारीं श्रीहरि भेटाया आले
नग्ना लगबग गिरिजा धांवे सांवरु शालूला
हिसका बसुनी हार गळ्यांतिल तटकन तो तुटला
त्या हारांतिल मोती सैरावैरा ओघळले
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले
दशाननें पळवूनि जानकी नभःपथें नेली
अश्रुबिंदु जे देवी टपटप ढाळित त्या काळीं
तेचि राहिले असे चकाकत जाणों दिव्यबलें
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले
नरकपतीचा हल्ला आला चितोडनगराला
देवांनाही स्वर्गि जलदिनें वर्दी द्यायाला
सिद्धाग्नींतुनि फर्कन ज्वाला-लोळ नभीं उठती
चितोडगडवासिनी देवि तों त्यावरि आरूढती
ज्वालारूढा देवि दुरुनि त्या चमकति तेजबळें
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले
आकाशाच्या ग्रंथ-संग्रहालयासि अर्पियला
काळें ग्रंथ प्रचंड विश्वेतिहास जो लिहिला
रौप्यमुद्रिकांकित तद्भागां अनुक्रमें रचिलें
तयांचि तारे म्हणुनि ज्योतिषी भले भले चकले

* * *

परी सागरा, सांग काय ही लटपट ? ही कुठली
चटकचांदणी कवण ? नभांतुनि निसटुनिया विपलीं

अथ वा प्रकृतेर् नीले प्रावारे चन्द्रका इमे ।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः ॥

गिरिजा-शिवयोर् यद्वा लीलया रममाणयोः ।
आगच्छद् दर्शनाकाङ्क्षी देवो नारायणः स्वयम् ॥
द्वार-ताडन-शब्देन उत्थिता सहसा सती ।
स्रस्तांशुक-समाधाने व्यग्रहस्ता ससंभ्रमम् ॥
संभ्रम-च्छिन्न-तद्हारान् मुक्ताः कीर्णा इतस्ततः ।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः ॥

रावणेनाथ वा सीता ह्रियमाणा ख-वर्त्मना ।
विमुमोचाश्रुबिन्दून् यान् स्थूलान् मुक्ताफलोपमान् ॥
राजन्ते ऽद्यापि ते तत्र किमु दिव्यबलान्विताः ।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः ॥

चितोडपुरमाक्रामन् नरकाधिपतिर् यदा ।
वार्तां प्रापयितुं देवान् परचक्रस्य सत्वरम् ॥
सिद्धाग्नेर् ज्वालनिकरा उत्तस्थुः स्वर्गगामिणः ।
चितोडगडवासिन्यो यान् आरोहन्त सुव्रताः ॥
ज्वालारूढाश्च ता देव्यो भ्राजन्ते दूरतः स्थिताः ।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः ॥

अथ वा वर्तते व्योम्नि ग्रन्थानाम् आलयो महान् ।
यत्र विश्वेतिहासश्च स्थापितः काललेखितः ॥
तस्यैते क्रमिकाः खण्डा रौप्यमुद्रामयाक्षराः ।
अपि ज्योतिर्विदां यत्र महतां तारकाभ्रमः ॥

*　　　*　　　*

किं तु मां ब्रूहि हे सिन्धो ! किमिदं चौर्य-चेष्टितम् ?
निसृत्य नभसः केयं तारा स्वच्छन्दचारिणी ॥

मराठी ग्रंथ संग्रहालय ठाणे. स्थलप्रत.

रात्रीं ऐशा, अशी एकटी, लगबगिनें घुसली
तुझिया जलमंदिरीं सर्वेची दिसेनशी झाली.
लाजुं नको, जा भोग विलासा कामोत्सुक तूं, ती
तुझिया शतजलतरंगमंजुल सुखा साथ दे ती
प्रेमाची चांदणी परंतू ज्यांची दूर वसे
किती प्रवासी तळमळती बा, तुझ्या निकट ऐसे
तुझा तुझ्या चांदणिशी पाहुनि प्रिय संगम साचा
तव मत्सर ना, परी छळी त्या वियोग दयितांचा !

* * *

हे ताऱ्यांनों, जाणतसां का कुठुनि तुम्ही आला ?
कुठें चालला, कवण हेतु ह्या असे प्रवासाला ?
कवण हेतु जो ज्यास्तव तुम्हीं गगनगामि व्हावें
सूर्यापासुनि इतुकें दूरचि भूनें विचरावें
गजराजाहुनि फुलपांखरुंची सुरंग शोभावें
बीज फुलावें, फुलुनि सुकावें, सुकुनि बीज व्हावें
लहान मोठीं घटिका-यंत्रीं बहुविध यंत्रें तीं
स्वस्वगतीनें परि एक्याची साध्यास्तव फिरती
असा कोणता हेतु जयाच्या सिद्धीस्तव साचीं
विश्वाच्या या चक्रें फिरती भव्य घड्याळाचीं
अम्हां कळेना म्हणूनि पुसतों तुम्हां कळे कां तें
का न कळत वर्तवें जाणति इतकेंची ज्ञाते !

समुद्रमार्ग, १९०६ .

निशीथसमये ह्यस्मिन् एवमेकाकिनी द्रुतम् ।
सहसा ऽन्तर्हिता ऽभूत् ते प्रविश्य जलमन्दिरम् ॥

लज्ज मा, याहि कामार्त ! भुङ्क्ष्व भोगांस् तया सह ।
सुखं जलतरङ्गाणां मञ्जुलं या ऽभिनन्दति ॥

किं तु दूरस्थिता येषां वल्लभा प्रीतितारका ।
व्याकुलाः शतशः पान्थाः सन्ति ते तव संनिधौ ॥

न तेषां मत्सरः कोऽपि तव प्रियसमागमात् ।
निजकान्तावियोगस्तु नवीभवति दुःसहः ॥

*   *   *

अपि जानीथ हे ताराः ! यतो यूयं समागताः ?
किंनिमित्तः प्रवासो ऽयं कुत्र वा प्रस्थितास् तथा ?

हेतुना केन युष्माकं विद्यते गगने गतिः ।
केन वा भास्कराद् दूरं भ्रमणीयं भुवा ऽनया ॥

कुतश् चित्रपतंगा वा गजराजात् सुरूपिणः ।
पुष्पीभावश्च बीजस्य, शुष्कपुष्पस्य बीजता ॥
उच्चावचानि यन्त्राणि घटीयन्त्रगतानि वा ।
चलन्त्येकार्थसाध्यानि स्वस्व-गत्यनुसारतः ॥

को हेतुर् यस्य सिद्ध्यर्थं चक्राणीमानि सर्वशः ।
भ्रमन्ति विश्वसंज्ञस्य घटीयन्त्रस्य संततम् ॥

न जानीमो वयं, युष्मान् पृच्छामस् तेन हेतुना ।
किमजानन् प्रवर्तेत इत्येवाहुर् मनीषिणः ॥

# ३. प्रभाकरास

[ विनायकरावांचा पहिला मुलगा प्रभाकर हा चार वर्षांचा होऊन लहानपणींच वारला. ती वार्ता युरोपमध्यें कळली तेव्हां त्याच्या स्मृत्यर्थ त्यांनीं ही कविता रचली. ]

परिसुनि यौवन-लतिकेला तूं पहिलें फूल फुले
तनया, तनु थरथरली स्नेहें नेत्र स्निग्ध झाले
परंतु अमुचें अभिनव यौवन, त्यांत पितृत्वाचा
प्रथम समागम, गमुनी लज्जा-विनय मना साचा
नवप्रसव तव जननी मजला, दावित असतांही
गुरुजन-मर्यादेनें म्यां बहु पाहियलें नाहीं
चोरुनि घ्यावें कधीं कधीं तव अर्ध-चुंबनातें
सुखोत्सवें तंव आपण होउनि नयन झांकती ते
प्रभ्या प्रियकरा, होतासी बहु दिवस असा सखया
अमूर्त तूं कल्पना एक मधु-मधुर अशी हृदया १

शीघ्रचि सोडुनि अंक जननिचा दुडुदुडु धावत तूं
घरांत फिरतां डोळे भरुनी पाहिन हा हेतू
धरुनि मनीं मी उत्सुक असतां विदेश-गमनाचें
प्रभ्या प्रियकरा! कार्य उदेलें प्रियजन-विरहाचें
मातृस्तनपानांत दंग तूं असतांना तुजला
तव जननीसह चुंबुनि केलें विदेश-गमनाला
अंतरतां मज प्रीति-तरु-लता खेद अती झाला
सत्य सांगतां, परी न गमला बहु तव विरह मला
देशिं जसा होतास विदेशीं सन्निधची सखया
अमूर्त तूं कल्पना एक मधु-मधुर अशी हृदया २

# ३. प्रभाकरं प्रति

[ श्री सावरकराणां ज्येष्ठः पुत्रः चतुर्वर्षदेशीय एव लोकान्तरम् अगमत्। वार्ताम् एतां श्रुत्वा आङ्ग्लभूमिस्थैः सावरकरैः निजभावनाः अस्मिन् पद्ये ग्रथिताः। ]

यौवनाख्य-लतायां त्वां प्रसूतं प्रथमं सुमम्।
श्रुत्वा रोमाञ्चितः कायः स्निग्धं चक्षुश् च मे ऽभवत्॥

वयसो नूतनत्वात्तु प्रथमाधिगमात् तथा।
पितृत्वस्य, तदा ऽभूवं लज्जाविनय-यन्त्रितः॥

जनन्यां दर्शयन्त्यां त्वां नवजातं पुनः पुनः।
नापश्यं विवृताक्षो ऽहं मर्यादाभङ्गशङ्कितः॥

यदा कदा हि वत्स! त्वाम् ईषच् चुम्बितवान् रहः।
स्वयमेव तदा नेत्रं मीलति स्म सुखान् मम॥

एवमासीः 'प्रभ्या'! वत्स, सखे त्वं दिवसान् बहून्।
अमूर्तः कल्पनामात्रो मधुरो 'हृदयंगमः'॥ १॥

मातुरङ्कं विहायाशु जानुभ्यां चङ्क्रमिष्यते।
अनिमेषित-नेत्राभ्यां तदा द्रक्ष्याम्यहं शिशुम्॥

विचिन्तयति मय्येवं 'प्रभ्या'! सोत्सुकचेतसि।
विदेशगमनं प्राप्तं विप्रयोगकरं प्रियैः॥

स्तनपाने ऽथ सक्तं त्वां जनन्या अमृतायिते।
जनन्या सह चुम्बित्वा विदेशं गतवान् अहम्॥

प्रीति-पुष्प-लतानां मां विरहो बह्वखेदयत्।
त्वद्वियोगस्तु, यत्सत्यं, न तथा माम् अपीडयत्॥

संनिधौ हि ममासीस् त्वं विदेशेऽपि यथा गृहे।
अमूर्तः कल्पनामात्रो मधुरो हृदयंगमः॥ २॥

अतनु मूर्ति तव लटकुनि कितिदां हृदयाशीं निजली
हसली कितिदां दिव्याशेनें कितिदां ती सजली
धर्म-कार्य-सिद्ध्यर्थ धाडुनी रणीं खड्गपाणी
बाल बाल-झुंझार आपुले श्रीगोविंदांनीं
हुतात्म होतां हसत पाहिले सुकीर्ति परिसुनि ती
म्यांहि कितीदां रणीं पाहिली अमूर्त तव मूर्ती
एके समयीं प्रभ्या प्रियाळा! विषम वृत्त आलें
वसंत-विन्हल लतातरू ते विन्हल बहु झाले
मृत्यु-वंचकें हरुनि मूर्ति तव वंचित त्या केलें
परी सत्य सांगतां न कांहीं हरूनि मम नेलें
पूर्वीं जसा होतास असति तूं नंतरही सखया
अमूर्त तूं कल्पना एक मधु-मधुर अशी हृदया ३
हृदय जोंवरी प्रभ्या प्रियाळा, असाचि तिथ राहे
पूर्वार्जित मद्-हृदय गृह असे तुझेचि तनया हे
परि जैं वारे क्रुद्ध वर्षती मेघ-शिला-धारा
सुरक्षित न हें गमे गृह सख्या तुझिया आधारा
महाराष्ट्रवाक्-सुंदरीसवें श्रीगोविंदातें
विहार जेथें अखंड सुंदर-मणिमयमंदिर तें
तुला गेह हें यास्तव अर्पी सरस्वती स्वकरें
जिथें क्रांतिचे शिवूं न शकती अग्नि-मेघ-वारे
अमर-मंदिरीं नांद सदोदित सलील बाळा, या
अमूर्त तूं कल्पना एक मधु-मधुर अशी हृदया

लंडन, १९०९

पश्चाल्लेख जिथें न शकती शिवूं भासले अग्नि मेघ वारे
तिथेंहि शकले शिवूं क्रांतिचे अग्नि-मेघ वा रे!

अंदमान, १९१२

---

अतनुस् ते तनुः सुप्ता निकटे नैकदा मम ।
नैकदा ऽस्मेष्ट दिव्याशायुता ऽभूषत नैकदा ॥

धर्मकार्यस्य सिद्ध्यर्थं श्रीगोविन्दः स्वयं सुतान् ।
युद्धाय बालवीरान् स्वान् खड्गहस्तान् व्यसर्जयत् ॥

हुतात्मभूतांश्चापश्यत् स्मेरः सत्कीर्तिकारणात् ।
मयाऽपि नैकदा मूर्तिर् अमूर्ता ऽदर्शि ते रणे ॥

अथैकदा 'प्रभ्या'! जात, दुःखदं वृत्तमागतम् ।
यल् लतातरवो जाता वसन्तविरहाकुलाः ॥

मृत्युना वञ्चकेन त्वां हरता वञ्चिता हि ते ।
न किंचिदपि, यत्सत्यं, हृतमेतावता मम ॥

यथा हि पूर्वमासीस् त्वं तथैवाद्यापि वर्तसे ।
अमूर्तः कल्पनामात्रो मधुरो हृदयंगमः ॥ [ २ ]

एवमेव 'प्रभ्या'! तिष्ठ हृदि मे यावदस्ति तत् ।
तवैव ननु तन् न्याय्यं गृहं पूर्वार्जितं सुत ॥

क्रुद्धा वातास् तु वर्षन्ति मेघ-धारा-शिला यतः ।
अतो न तदपि क्षेमं मन्ये वेश्म सखे तव ॥

गुरु-गोविन्दसिंहस्य विहारा यत्र शाश्वताः ।
मन्दिरं सुन्दरं देवी-मराठीवाग्-विनिर्मितम् ॥

तदर्पयति ते गेहं साक्षाद् देवी सरस्वती ।
न स्प्रष्टुमपि शक्तास् त्वां यत्र क्रान्त्यग्निमारुताः ॥

नन्दास्मिन् मन्दिरे पुत्र यावच्चन्द्रदिवाकरौ ।
अमूर्तः कल्पनामात्रो मधुरो हृदयंगमः ॥

लण्डन, १९०९

पश्चाल्लेख :

अग्नि-मेघ-समीराणां गतिर् यत्र न तर्किता ।
अपि तत्र समासेदुः क्रान्ति-मेघाग्नि-मारुताः ॥

# ४. सागरास–



ने मजसी ने परत मातृभूमीला । सागरा, प्राण तळमळला
भूमातेच्या चरणतला तुज धूतां । मीं नित्य पाहिला होता
मज वदलासी अन्य देशिं चल जाऊं । सृष्टिची विविधता पाहूं
तइं जननी-हृद् विरहशंकितहि झालें । परि तुवां वचन तिज दिधलें
मार्गज्ञ स्वयें मीच पृष्ठिं वाहीन । त्वरित या परत आणीन

विश्वसलों या तव वचनीं । मी
जगदनुभव-योगें बनुनी । मी
तव अधिक शक्त उद्धरणीं । मी

येईन त्वरें कथुन सोडिलें तिजला । सागरा, प्राण तळमळला १

शुक पंजरिं वा हरिण शिरावा पाशीं । ही फसगत झाली तैशी
भूविरह कसा सतत साहुं यापुढती । दशदिशा तमोमय होती
गुण-सुमनें मीं वेचियलीं या भावें । कीं तिनें सुगंधा घ्यावें
जरि उद्धरणीं व्यय न तिच्या हो साचा । हा व्यर्थ भार विद्येचा

## ४. सागराकुलाः प्राणा मे

[ शासनस्य रोषपात्रीभूते अभिनव-भारते सर्वथा अशक्यम् अधुना मम भारतं प्रति निवर्तनम् इति दृढा मतिर् अभूत् श्री. विनायकरायाणाम्। एतादृश्याम् अवस्थायाम् एकदा ब्रायटन-ग्रामे समुद्रतीरं गतानां तेषां सहसा प्रियजनस्मरणेन एवं श्लोकत्वम् आपद्यत शोकः—]

नय पुनरपि मां, प्रापय मातृभुवं मे। सागराकुलाः प्राणा मे।
भूमातुर् मे चरणयुगं धावन्तम्। दृष्टवान् अहं त्वां नित्यम्।
मां चावादीर् 'एहि, व्रजामो दूरम्। पश्याम सृष्टिवैचित्र्यम्।'
अथ मन्मातुर् हृदयं विरहत्रस्तम्। तत् स्वयं त्वयैवाश्वस्तम्।
'मार्गज्ञो ऽहं, पुनरिममानेष्यामि। पृष्ठतः स्वयं वक्ष्यामि।'

तव वचने ऽस्मिन् विश्वसता
अथ मया ऽऽमन्त्रिता माता
'तव मुक्त्यै पुनरागन्ता

अवलोक्य जगद् द्विगुणीकृत्य बलं मे।' सागराकुलाः प्राणा मे ॥१॥

पञ्जरं शुको विशति, मृगो वा जालम्। एवमेव पाशगतो ऽहम्।
जननीविरहं ब्रूहि कथं हि सहामि। सर्वतस् तमसि मज्जामि।
ननु मातृकृते गुणकुसुमानि चितानि। म्लास्यन्ति तथैवैतानि।
जननीमोक्षे विनियुक्ता यदि न स्यात्। भार एव विद्या मे स्यात्।

ती आम्रवृक्षवत्सलता । रे
नवकुसुमयुता त्या सुलता । रे
तो बाल गुलाबहि आतां । रे
फुलबाग मला हाय पारखा झाला । सागरा, प्राण तळमळला २

नभिं नक्षत्रें बहुत एक परि प्यारा । मज भरतभूमिचा तारा
प्रासाद इथें भव्य परी मज भारी । आइची झोपडी प्यारी
तिजवीण नको राज्य, मज प्रिय साचा । वनवास तिच्या जरि वनिंचा
भुलविणें व्यर्थ हें आतां । रे
बहु जिवलग गमतें चित्ता । रे
तुज सरित्पते ! जी सरिता । रे
तद्विरहाची शपथ घालितों तुजला । सागरा, प्राण तळमळला ३

या फेन-मिषें हंससि निर्दया कैसा । कां वचन भंगिसी ऐसा ?
त्वत्स्वामित्वा सांप्रत जी मिरवीतें । भिउनि का आंग्लभूमीतें ?
मन्मातेला अबल म्हणुनि फसवीसी । मज विवासनातें देशी
तरि आंग्लभूमी-भयभीता । रे
अबला न माझिही माता । रे
कथिल हें अगस्तिस आतां । रे
जो आचमनीं एक क्षणिं तुज प्याला । सागरा, प्राण तळमळला ४
ब्रायटन, १९०९

सागराकुलाः प्राणा मे

सा आम्रवृक्षवत्सलता
नवकुसुमयुताः सुभगलताः
नव 'गुलाब' पुत्रीभूताः
हा ! चिरनष्टा पुष्पवाटिका सा मे । सागराकुलाः प्राणा मे ॥ २ ॥

नक्षत्राणामस्तु मालिका कामम् । भरतभू रोचते मह्यम् ।
प्रासादानां सन्ति कोटयः, सन्तु । प्रियतरा कुटी मे मातुः ।
अपि राज्यं मे त्याज्यं जननीहीनम् । सह तया सुखं यामि वनम् ॥
अलमलं मोहयित्वैवम्
विरहेण शपेयं तुभ्यम्
प्रियतमया सरिता सार्धम्
यदि सरित्पते ! मां नयसि न देशं मे । सागराकुलाः प्राणा मे ॥ ३ ॥

किं फेनमिषाद् हससि निर्दयैवं त्वम् ? वाक्यं न रक्षसि स्वीयम् ।
अपि भीतोऽसि त्वमाङ्ग्लभूमेर् अस्याः । सागरस्वामिमानिन्याः ?
अबलां मत्वा मम जननीं वञ्चयसे । मां तथा च निर्वासयसे ।
हे आङ्ग्लभूमि-भयभीत
न ममापि दुर्बला माता
सा ऽगस्त्याय निवेदयिता
प्राश्नाद् यस्त्वाम् एकस्मिन्नाचमने । सागराकुलाः प्राणा मे ॥ ४ ॥

# ५. सांत्वन



(१)

जयासी तुवां प्रतिपाळिलें । मातेचें स्मरण होऊं न दिलें
श्रीमती वहिनी वत्सले । बंधु तुझा तो तुज नमीं
आशीर्वादपत्र पावलें । जें लिहिलें तें ध्यानीं आलें
मानस प्रमुदित झालें । धन्यता वाटली उदंड
धन्य धन्य आपुला वंश । सुनिश्चयें ईश्वरी अंश
कीं रामसेवा-पुण्य-लेश । आपुल्या भाग्यीं लाधला

(२)

अनेक फुलें फुलतीं । फुलोनियां सुकोन जाती
कोणीं त्यांची महती गणती । ठेविली असे ?
परी जें गजेंद्रशुंडेनें उपटिलें । श्रीहरीसाठीं मेलें

# ५. सान्त्वनम्

[ १९०९ खिस्ताब्दे श्री. सावरकराणां ज्येष्ठो भ्राता गणेशपन्त इत्याख्यः शासनेन द्वीपान्तरे निर्वासितः, कनीयांश्च भ्राता 'बाळ' इत्याख्यः (डॉ. सावरकर) बन्दिग्राहं गृहीतः। तदानीं वृत्तद्वयम् एतत् विसृष्टवत्यै ज्येष्ठायै भ्रातृजायायै यशोदाबाई इत्याख्यायै अशरणायै व्यथितचित्तायै च सान्त्वनपरं पद्यम् इदं प्रेषितं श्री. विनायकरायैः। ]

१

नमो ऽस्तु शिरसा तुभ्यं वत्सले 'वहिनी!' मम।
ययास्मि वर्धितस् तादृग् यथा माता ऽपि न स्मृता ॥ १ ॥

आशीर्भूतं तव प्राप्तं पत्रं, ज्ञातस् तदाशयः।
मानसं मुदितं जातम् अनुभूता च धन्यता ॥ २ ॥

धन्यो ऽस्माकम् अहो वंशो नूनमीशांशसंभवः।
यल्लब्धो रामसेवायाः पुण्यलेशो विधेर् वशात् ॥ ३ ॥

२

कुसुमानां सहस्राणि विकसन्ति दिने दिने।
विकस्य ग्लानतां यान्ति केन तद्गणना ऽऽदृता ? ॥ ४ ॥

शुण्डया खण्डितं किं तु यद् गजेन्द्रेण पङ्कजम्।
अगच्छद् बलितां विष्णोर् अमरं मोक्षदं च तत् ॥ ५ ॥

कमलफूल तें अमर ठेलें । मोक्षदातें पावन
त्या पुण्य गजेंद्रासमची । मुमुक्षु-स्थिती भारतीची
करुणारवें ती याची । इंदीवरश्यामा श्रीरामा
स्वोद्यानीं तिनें यावें । आपुल्या फुलास भुलावें
खुडोनियां अर्पण करावें । श्रीरामचरणां
धन्य धन्य आपुला वंश । सुनिश्चयें ईश्वरी अंश
श्रीराम-सेवा-पुण्य-लेश । आपुल्या भाग्यीं लाधला

(३)

अशींच सर्व फुलें खुडावीं । श्रीरामचरणीं अर्पण व्हावीं
कांहीं सार्थकता घडावी । या नश्वर देहाची
अमर होय ती वंशलता । निर्वंश जिचा देवाकरितां
दिगंतीं पसरे सुगंधता । लोकहितपरिमलाची
सुकुमार आमुच्या अनंत फुलां । गुंफोनि करा हो सुमन-माला
नवरात्रीच्या नवकाला । मातृभूमी वत्सले
एकदां नवरात्र संपली । नवमाला पूर्ण झाली
कुलदेवी प्रकटेल काली । विजयालक्ष्मी पावन

(४)

तूं धैर्याची असली मूर्ति । माझे वहिनी, माझे स्फूर्ति
रामसेवाव्रताची पूर्ति । ब्रीद तुझें आधींच
महत्कार्याचें कंकण धरिलें । आतां महत्तमत्त्व पाहिजे बाणलें
ऐसें वर्तन पाहिजे केलें । कीं जें पसंत पडलें संतांना
अनेक पूर्वज ऋषीश्वर । अजात वंशजांचे संभार
साधु साधु गर्जतील । ऐसें वर्तणें या काला

लंडन, १९०९

मुमुक्षुर् हिन्दुभूर् अद्य गजेन्द्रो ऽसौ यथा पुरा ।
राममिन्दीवरश्यामं करुणं प्रार्थयत्यसौ ॥ ६ ॥

सा ऽऽगच्छतु निजोद्यानं मोदतां कुसुमैः स्वकैः ।
लूत्वा ऽर्पयतु पुष्पाणि श्रीरामचरणाब्जयोः ॥ ७ ॥

धन्यो ऽस्माकम् अहो वंशो नूनम् ईशांशसंभवः ।
यल्लब्धो रामसेवायाः पुण्यलेशो विधेर् वशात् ॥ ८ ॥

३

लूयन्तां सर्वपुष्पाणि सन्तु रामार्पितानि च ।
अंशतोऽपि व्रजेद् देहो नश्वरो येन सार्थताम् ॥ ९ ॥

अमरा वंशवल्ली सा योच्छिन्ना देवकारणात् ।
आ दिगन्तात् प्रवात्यस्या विश्वमङ्गलसौरभम् ॥ १० ॥

अस्माकं प्राण-पुष्पाणां ग्रथित्वा नव मालिकाः ।
नवरात्रार्चनार्थाय मातृभूमे बलीकुरु ॥ ११ ॥

नवरात्रे व्यतिक्रान्ते नवमालार्पणे सति ।
झटित्यवतरेत् काली विजयश्रीः सुमङ्गली ॥ १२ ॥

४

मूर्तिस् त्वं धीरभावस्य स्फूर्तिर् मे ‘ वहिनी ’ तथा ।
पूर्तिः श्रीरामसेवायाः पूर्वमेव व्रतं तव ॥ १३ ॥

महतः कर्मणो दीक्षा गृहीता ऽपेक्षते द्वयम् ।
माहात्म्यं मेरुसंकाशं वर्तनं चर्षिसंमतम् ॥ १४ ॥

पूर्वजा ऋषयो ऽनेके वंशजा ये च भाविनः ।
‘ साधु ’ ‘ साधु ’ यथा ब्रूयुर् वर्तितव्यं तथा ऽधुना ॥ १५ ॥

# ६. माझें मृत्युपत्र

[ १९१० च्या मार्च महिन्यांत विनायकराव सावरकर विलायतेंत पकडले गेले. तेव्हां या जन्मांत जिची पुन्हां भेट होणें जवळ जवळ असंभवनीय झालेलें होतें त्या आपल्या पूजनीय वहिनीवर आपल्या अटकेच्या वृत्तकथनाचा कुठाराघात करण्याचें कटु कर्तव्य करतांनाच त्यांतील उदात्त आकर्षक दिव्य मर्म व्यक्त करण्यास्तव विनायकरावांनीं लंडनमधील ब्रिक्स्टन जेलमधून आपल्या या जन्मांतला बहुधा शेवटचा होऊं पाहणारा हा निरोप— हें मृत्युपत्र—लिहून धाडिलें होतें. ]

(१)

वैशाखिचा कुमुदनाथ नभांत हांसे
यच्चंद्रिका धवल सौधतलीं विलासे
घाली स्वयें जल जिला प्रिय बाळ लोभें
जाई फुले, परिमलें सुमनांत शोभे ॥ १ ॥

आले घरीं सकल आप्त-सुहृद् जिवाचे
आनंदमग्न कुळ गोकुल काय साचें
आदर्श दीप्ति-शुचिता-धृति-यौवनांचें
पाहूनि जें तरुण-मंडळ कीर्ति नाचे ॥ २ ॥

प्रेमें हृदें विकसलीं नव यौवनाच्या
गंधें सुवासित उदात्त सुसंस्कृतीच्या
दिव्या लता-तरुंसि जें गृह बाग झाला
ज्या पौर हर्षित वदे जन ‘ धर्म-शाला ’ ॥ ३ ॥

सैंपाक त्वां निजकरें कुशलें करावा
प्रेमें तुझ्या अधिकची सु-रसाळ व्हावा

# ६. मदीयं निर्याणपत्रम्

[ १९१० ख्रिस्ताब्दस्य मार्च-मासे कारागारे निक्षिप्ताः श्री. सावरकराः आङ्ग्लभूमौ। तदानीम् असंभवनीप्राय-पुनर्दर्शनायै वन्दनीयायै भ्रातृ-जायायै स्वीय-कारागार-प्रवेशस्य दुःखदमपि वृत्तं कर्तव्यत्वेन निवेदयितु-कामैः तदन्तर्हितम् उदात्तं गूढाशयं प्रकटीकर्तुम् अयम् अन्तिमप्रायः संदेशः—इदं निर्याणपत्रम्—व्यसृज्यत। ]

( १ )

वैशाखमासि रजनीरमणो व्यराजज्
ज्योत्स्नामयेन हसितेन विधौतहर्म्यः।
'बालेन' पायितजला स्वयमेव रागात्
सर्वोत्तरं परिमलं व्यसृजच्च जाती ॥ १ ॥

प्राप्तस् तदा सकल-बान्धवमित्रवर्गो
येनाव्रजन् मुदितगोकुलतां कुलं नः।
यं वीक्ष्य दीप्ति-शुचिता-धृति-मूर्तिधारं
यूनां समाजमपि नृत्यति कीर्तिदेवी ॥ २ ॥

उद्यानमेव समभूद् अथ वा गृहं तद्
दिव्याङ्गनापुरुष-वल्लरिकाद्रुमाढ्यम्।
उत्फुल्ल-हृत्कुसुमकं नवयौवनेन
सत्संस्कृतेः परिमलेन सुगन्धितं च ॥ ३ ॥

पाकं त्वमेव कुरुषे लघुहस्तसिद्धं
त्वत्स्नेह-वर्धित-रसं 'वहिनी' तदानीम्।

संवाद सर्व मिळुनी करितां नितांत
जेवावयासि बसलों जइं चांदण्यांत ॥ ४ ॥

श्रीरामचंद्र-वनवास-कथा रसाळा
कीं केंवि देश इटली रिपुमुक्त झाला
तानाजिचा समरधीर तसा पवाडा
गावा चितोरगड वा शनवारवाडा ॥ ५ ॥

झाली कशी प्रियकरा अपुली अनाथा
दुर्दास्य-खिन्न शरभिन्न विपन्न माता
शोकें विवंचुनि तिच्या जइं मोचनाचे
केले अनंत तरुणा उपदेश साचे ॥ ६ ॥

तो काळ रम्य, मधुरा प्रिय-संगती ती
तें चांदणें, नवकथा-रमणीय रात्री
तें ध्येय दिव्य निजमातृ-विमोचनाचें
तो उग्र निश्चयहि, ते उपदेश साचे ॥ ७ ॥

झाल्या तदा प्रियकरांसह आणभाका
त्या सर्व देवि वहिनी स्मरती तुम्हां का ?
'बाजी प्रभू ठरुं' वदे युवसंघ सर्व
'आम्ही चितोरयुवती' युवती सगर्व ॥ ८ ॥

कीं घेतलें व्रत न हें अम्हिं अंधतेनें
लब्धप्रकाश इतिहास-निसर्ग-मानें
जें दिव्य दाहक म्हणूनि असावयाचें
बुद्ध्याचि वाण धरिलें करिं हें सतीचें ॥ ९ ॥

अन्योन्यभाषणपरा अथ भोजनार्थम्
देशे सुधांशुविशदे वयमास्महे स्म ॥ ४ ॥

श्रीरामचन्द्र-वनवास-कथा रसाला
मुक्तेः कथा रिपुवशाद् इटली-भुवो वा ।
तानाजि-वीरचरितं शनिवारवाडा-
गाथा ऽप्यगीयत यदा ऽथ चितोडगीतम् ॥ ५ ॥

जाता कथं परवशा प्रियमातृभूमिर्
दुर्दास्य-दिग्ध-शर-भिन्न-विपन्न-खिन्ना ।
यत्रेति चिन्तनयुतं जननीविमुक्त्यै
मार्गोपदेशनमभूद् युवमण्डलस्य ॥ ६ ॥

कालो मधुः स, मधुरः प्रियसंगमो ऽसौ
सा चन्द्रिका, नवकथा-सुभगा निशा सा ।
ध्येयं च दिव्यमथ मातृविमोक्षरूपं
निर्धार उग्र, उपदेश-कृतिश् च तथ्या ॥ ७ ॥

कच्चित् कृताः स्मरसि ता ‘ वह्निनी ’ प्रतिज्ञाः
तत्राभवन् प्रियजनैः सह यास् तदानीम् ।
“ बाजिप्रभुं ह्यनुसरेम वयं ” युवानो
“वीराश् चितोड-युवतीश् च वयं” युवत्यः ॥ ८ ॥

नाङ्गीकृतं व्रतमिदं सहसा ऽन्धभक्त्या
स्पष्टं हि दृष्टमितिहास-निसर्ग-तर्कैः
दिव्य-स्वरूपमत एव च दाहकं यद्
बुद्ध्यैव विद्ध्यनुसृतं तदिदं सतीत्वम् ॥ ९ ॥

(२)

ज्या होति तैं प्रिय जनांसह आणभाका
त्यातें स्मरोनि मग सांप्रत हें विलोका
नाहीं पुरीं उलटलीं जरि आठ वर्षें
तों कार्यसिद्धि इतुकी मन कां न हर्षे? ॥ १० ॥

आसेतु-पर्वत उचंबळला स्वदेश
वीराकृती धरित टाकुनि दीनवेष
भक्तांचिया रघुपदीं झुलताति झुंडी
जाज्वल्य होयहि हुताशन यज्ञकुंडीं ॥ ११ ॥

तो यज्ञ सिद्ध करण्यास्तव उग्र दीक्षा
जे घेति येइ नइं तत्कृतिची परीक्षा ।
"विश्वाचिया अखिल मंगल-धारणाला
बोला असे कवण भक्ष्य हुताशनाला?" ॥ १२ ॥

आमंत्रण प्रभु रघूत्तम सोडितां हें
"दिव्यार्थ, देव! अमुचें कुल सज्ज आहे"
हे साध्वि गर्जुनि असें पहिल्या हवीचा
हा ईश्वरी मिळविला अग्नि मान साचा ॥ १३ ॥

धर्मार्थ देह वदलों ठरलें नितान्त
ते बोल फोल नच बालिश बायकांत
ना भंगली भिउनियां धृति यातनांना
निष्कामकर्मरति योगहि खंडिला ना ॥ १४ ॥

ज्या होति तैं प्रियजनांसह आणभाका
केल्याची सत्य कृतिनें अजि ह्या विलोका

(२)

वृत्तास् तदा प्रियजनैः सह याः प्रतिज्ञाः
संस्मृत्य तास् तदनु देवि विलोकयैतत्।
वर्षाणि यद्यपि गतानि न पूर्तिमष्टौ
कार्यस्य सिद्धिरियती, न कुतः प्रहर्षः? ॥ १० ॥

आ सेतुतो हिमवदन्तमभूद् उदीर्णो
देशोऽजहात् कृपणतां धृतवीरभावः।
भक्ता मिलन्त्ययुतशो रघुपादमूले
जाज्वल्यते हवनकुण्डगतश्च वह्निः ॥ ११ ॥

तत्रासते क्रतुवराय च दीक्षिता ये
तेषां तदा रघुवरेण कृता परीक्षा।
"त्रैलोक्य-मङ्गलकराय हुताशनाय
सिद्धोऽस्ति को वदत देहसमर्पणाय" ॥ १२ ॥

आह्वान एवमथ राघवमुक्तमात्रे
"दिव्याय राघव! सदा कुलमुद्यतं नः।"
इत्थं विघोष्य हविषः प्रथमस्य साध्वि
संमानमैश्वरमहो वयमाप्तवन्तः ॥ १३ ॥

धर्मार्थ-देहमवदाम पुरा वयं यद्
याथार्थ्यमेत् तदबलासु न बालिशोक्तिः।
भग्ना धृतिर् न च भिया गुरुयातनाभ्यो
निष्कामकर्मणि रतिश् च न खण्डिताऽभूत्॥१४॥

वृत्तास् तदा प्रियजनैः सह याः प्रतिज्ञा
आपादिताः करणतश् चरितार्थतां ताः।

दीप्तानलांत निजमातृ-विमोचनार्थ
हा स्वार्थ जाळुनि अम्ही ठरलों कृतार्थ ॥ १५ ॥

(३)

हे मातृभूमि! तुजला मन वाहियेलें
वक्तृत्व वाग्विभवही तुज अर्पियेलें
तूतेंचि अर्पिलि नवी कविता रसाला
लेखाप्रती विषय तूंचि अनन्य झाला ॥ १६ ॥

त्वत्स्थंडिलीं ढकलिलें प्रिय मित्रसंघा
केलें स्वयें दहन यौवन-देह-भोगां
त्वत्कार्य नैतिक सुसंमत सर्व देवा
तत्सेवनींच गमली रघुवीर-सेवा ॥ १७ ॥

त्वत्स्थंडिलीं ढकलिली गृहवित्तमत्ता
दावानलांत वहिनी नवपुत्रकान्ता
त्वत्स्थंडिलीं अतुल-धैर्य वरिष्ठ बन्धु
केला हवी परमकारुण पुण्यसिन्धु ॥ १८ ॥

त्वत्स्थंडिलावरि बळी प्रिय बाल झाला
त्वत्स्थंडिलीं बघ अतां मम देह ठेला
हें काय, बन्धु असतों जरि सात आम्ही
त्वत्स्थंडिलींच असते दिधले बळी मीं ॥ १९ ॥

संतान या भरतभूमिस तीस कोटी
जे मातृभक्ति-रत सज्जन धन्य होती
हें आपुलें कुलहि त्यांमधिं ईश्वरांश
निर्वंश होउनि ठरेल अखंड-वंश ॥ २० ॥

दीप्तानले च निजमातृविमोचनार्थं
दग्ध्वा निजार्थमभवाम वयं कृतार्थाः ॥ १५ ॥

(३)

तुभ्यं मनोऽर्पितमिदं मम मातृभूमे
तुभ्यं च वैभवगुरुः पटुवाग्विलासः।
काव्यं नवं रसघनं च तथैव तुभ्यं
एका त्वमेव विषयो मम लेखनेऽभूः ॥ १६ ॥

त्वत्स्थण्डिलाहुतिकृतः प्रियमित्रसंघो
भोगक्षम नव-वयो, वपुरुत्तमं च।
कार्यं च यत् सुरमतं तव मोक्षणार्थं
पुण्यं, तदेव रघुपूजनतां ममागात् ॥ १७ ॥

त्वत्स्थण्डिलाहुतिकृतं गृहमस्मदीयं
कान्ता च नूतनसुता, सकलं च वित्तम्।
भ्राता तथा सकलधैर्यवतां वरिष्ठो
ज्येष्ठो ह्यसौ परमकारुण-पुण्यसिन्धुः ॥ १८ ॥

त्वत्स्थण्डिलाहुतिरभूत् स च 'बाल'-बन्धुस्
त्वत्स्थण्डिले च मम संप्रति देहपातः।
एतद् हि किं, यदपि सप्त वयं भवेम
सप्तापि तांस् तव कृते अहमुत्सृजेयम् ॥ १९ ॥

सन्तीह भारतसुता बहुकोटिसंख्या
ये मातृभक्ति-निरताः सुजनाश् च धन्याः।
ईशांशसंभवमिदं च तथा कुलं नः
उच्छिन्नवंशमपि नूनमखण्डवंशम् ॥ २० ॥

(४)

कीं तें ठरोहि अथवा न ठरो परन्तु
हे मातृभू अम्हि असों परिपूर्ण-हेतु
दीप्तानळांत निज-मातृ-विमोचनार्थ
हा स्वार्थ जाळुनि अम्ही ठरलों कृतार्थ ॥ २१ ॥

ऐसे विवंचुनि, अहो वहिनी! व्रतातें
पाळोनि वर्धन करा कुल-दिव्यतेतें
श्रीपार्वती तप करी हिमपर्वतीं ती
कीं चित्तवांत हसल्या बहु राजपूती ॥ २२ ॥

तें भारतीय अबला-बल-तेज कांहीं
अद्यापि या भरतभूमिंत लुप्त नाहीं
हें सिद्ध होइल असेंचि उदार उग्र
वीरांगने, तव सुवर्तन हो समग्र ॥ २३ ॥

माझा निरोप तुज येथुनि हाच देवी
हा वत्स वत्सल तुझ्या पदिं शीर्ष ठेवी
सप्रेम अर्पण असो प्रणती तुम्हांतें
आलिंगन प्रियकरा मम अंगनेतें ॥ २४ ॥

कीं घेतलें व्रत न हें अम्हि अंधतेनें
लब्ध-प्रकाश इतिहास-निसर्ग-मानें
जें दिव्य, दाहक म्हणूनि असावयाचें
बुद्ध्याचि त्राण धरिलें करिं हें सतीचें ॥ २५ ॥

लंडन, १९१०

( ४ )

यातु प्रमाणपदवीम् अथ वा न यातु
एतद्, वयं तु परिपूर्ण-मनोरथाः स्मः ।
दीप्तानले हि निजमातृविमोचनार्थं
दग्ध्वा निजार्थमभवाम वयं कृतार्थाः ॥ २१ ॥

इत्थं विचिन्त्य 'वहिनी' ! व्रतपालनेन
दिव्यात्मतां निजकुलस्य विवर्धयस्व ।
उग्रं सती हिमनगे तप आचचार
अग्नौ अपि स्मितयुता रजपूतनार्यः ॥ २२ ॥

तेजोऽबलाजन-बलस्य च भारतीयं
तन् नास्ति लुप्तमधुनाऽपि हि भारतेऽस्मिन् ।
एतद् यथा भवति सिद्धम्; उदारमुग्रं
वीराङ्गनेऽस्तु तव सच्चरितं समग्रम् ॥ २३ ॥

संदेश एष, इतरो न, मम प्रति त्वां
वत्सो नमामि तव वत्सल-पादयुग्मम् ।
स्निग्धाऽर्पिताऽस्तु 'वहिनी' ! प्रणतिश् च तुभ्यम्
आलिङ्गनं च सुदृढं प्रिय-धर्मपत्न्यै ॥ २४ ॥

नाङ्गीकृतं व्रतमिदं सहसाऽन्धभक्त्या
स्पष्टं हि दृष्टमितिहास-निसर्ग-तर्कैः ।
दिव्यस्वरूपमत एव च दाहकं यद्
बुद्ध्यैव विद्ध्यनुसृतं तदिदं सतीत्वम् ॥ २५ ॥

---

# FAREWELL

[ A part of the letter written in 1910 by Shri Savarkar to his friends and comrades in Paris on the eve of his being extradited to India from the Brixton Jail, London. ]

We part to play our God-appointed parts; now pent and nailed to burning Rocks ; now tossed on surging waves of Fame; now seen, now lost, or humble or exalted–wherever posted by the Lord of Hosts, yet posted best, as if alone it was the mission of our life thus there to act !

As in some oriental play sublime, all characters, the dead as well as living in Epilogue they meet; thus, actors we innumerable all, once more shall meet on History's copious stage before the great applauding audience of Humanity, that would with grateful cheer fill hill and dale. Till then, Oh loving friends, Farewell ! Farewell !!

* * *

# ७. तावत्कालपर्यन्तं, प्रियवयस्याः, ‘नमस्ते’ ‘नमस्ते’ !

[ १९१० खिस्ताब्दे भारतं प्रति विसृज्यमाणैः सावरकरैः पॅरिस-नगरे स्थितेभ्यः सुहृत्-सहकारिभ्यः प्रेषितस्य अन्तिमपत्रस्य कश्चिद् अंशः। ]

वयम् अन्योन्यम् आपृच्छामहे।
विधातृविहितां स्वां स्वां भूमिकां नाटयितुम्।
कदाचिद् वयं तप्तशिलासु दृढं निगडिताः स्याम।
यशःसिन्धौ कदाचित् तरङ्गात् तरङ्गान्तरम् आरुहेम।
कदाचिद् दृष्टाः, कदाचिन् नष्टाः।
कदाचिद् उच्चैः, कदाचिन् नीचैः।
अनन्तकोटिब्रह्माण्डनायकेन परमसेनानायकेन यत्र कुत्रापि निवेशिताः स्याम।
तदेव स्थानं परमं मन्यमानाः।
तेनैव कर्मणा आत्मानं धन्यं मन्यमानाः।
वयम् अन्योन्यम् आपृच्छामहे।
विधातृविहितां स्वां स्वां भूमिकां नाटयितुम्।
यथा कस्मिंश्चिन् नाटके भारतीये
सर्वे नटा अन्तिमेऽङ्के समेयुः।
एवं वयं-ये नटा एव सर्वे-
समेताः स्यामेतिहासस्य मञ्चे॥
सामाजिकीभूय मनुष्यजातिः
सर्वान् अस्मान् अभिनन्देत् कृतज्ञा।
आनन्दोत्थस् तालशब्दश् च यस्या
दिशः सर्वाः पूरयेत् चान्तरिक्षम्॥
तावत्कालपर्यन्तम्, प्रियवयस्याः, ‘नमस्ते’ ‘नमस्ते’।

*　*　*

Wherever may my humble ashes lie; in the Andaman's sad brook whose weeping course adds to its dreariness a tongue, or stored by Ganga's sacred crystal stream in which the stars their midnight measures dance--they will be stirred with fire and glow when Victory's trumpet blasts proclaiming "Shri Ram has crowned his chosen people's brow with laurels golden green ! The evil spirit is cast away and chased back to the deep from whence it first arose ! and lo ! She lordly stands, our Mother Ind, a beacon-light Humanity to guide ! Oh martyred saints and soldiers, do awake ! The battle is won in which you fought and fell ! ! "

Till then, oh loving friends, Farewell ! Farewell ! !

LONDON, 1910

यत्र कुत्रापि मे क्षुद्राणि अस्थीनि पतन्तु ।
अन्दमानद्वीपे—
यत्र कश्चिद् एकाकी खिन्नस्वान्त इव मन्दं मन्दं वहति निर्झरः ।
रुदितायमानेन मर्मरस्वनेन तत्रस्थस्य तमसः वाग्द्वारमिव
उद्घाटयन् ।
तादृशे निर्झरे ।
अथ वा गङ्गाप्रवाहे ।
स्फटिकधवले पुण्यसलिले ।
नृत्यपराणां ताराणाम् अपरस्मिन्निव निशीथरङ्गे ।
यत्र कुत्रापि तानि शेरताम् ।
यदा तु विजयशृङ्गं खणखणायिष्यते ।
गगनगामिना ध्वनिना त्रैलोक्यायेव उद्घोषयिष्यते ।
" जितं, जितम् ।
प्रियजनानाम् उरसि स्वयं श्रीरामेण विजयदाम अर्पितम् ।
' रक्षांसि भीतानि दिशो द्रवन्ति ' ।
बिलं स्वकीयं पुनराविशन्ति ॥
अपि च, पश्यत पश्यत ।
इयं समुत्तिष्ठति हिन्दमाता
दीप्तेन गर्वोन्नतमस्तकेन ।
नौभ्यो यथा दीपगृहं समुद्रे
विश्वाजनान् मार्गमिहादिशन्ती ॥
उत्तिष्ठत हुतात्मानो वीराः सत्पुरुषास्तथा ।
यत्राभूद् देहपातो वस्तद् युद्धं ह्यद्य निर्जितम् ॥ "
तानि मे अस्थीनि, यत्र कुत्रापि पतितानि ।
श्रुत्वैवेमां घोषणाम् ।
तेजसा इव अभिविज्वलिष्यन्ति, चैतन्येन इव प्रस्फुरिष्यन्ति ।
तावत्कालपर्यन्तम्, स्निग्धाः वयस्याः,
' नमस्ते ', ' नमस्ते ' ।

---

# ८. आत्मबल

[ मार्सेल्सिला बोटीवरून निसटण्याचा प्रयत्न केला, त्याचा सूड म्हणून आपला अमानुष छळ होणार या जाणिवेनें अशा छळांस पुरून उरेल अशा धैर्याचा पुरवठा करण्यासाठीं कवचमंत्र म्हणून ही कविता विनायकराव सावरकरांनीं रचली. ]

अनादि मी, अनंत मी, अवध्य मी भला
मारिल रिपु जगतिं असा कवण जन्मला ? ॥ ध्रु ॥

अट्टहास करित जई धर्मधारणीं
मृत्युसीच गांठ घलुं मी घुसें रणीं
अग्नि जालि मजसी ना खड्ग छेदितो
भिउनि मला भ्याड मृत्यु पळत सूटतो
खुळा ऽ रिपू ऽ । तया स्वयें
मृत्युच्याच भीतीनें भिववुं मजसि ये ॥ १ ॥

लोटि हिंस्र सिंहाच्या पंजरीं मला
नम्र दाससम चाटिल तो पदांगुला
कल्लोळीं ज्वालांच्या फेंकिशी जरी
हटुनि भंवति रचिल शीत सुप्रभावली
आण तुझ्या तोफांना क्रूर सैन्य तें
यंत्र तंत्र शस्त्र अस्त्र आग ओकतें
हलाहला ऽ । त्रिनेत्र तो
मी तुम्हांसि तैसाची गिळुनि जिरवितों ।

समुद्रमार्ग, १९१०

## ८. आत्मबलम्

[ मार्सेलिस-नौकाश्रये कृतस्य नौकातः पलायनापराधस्य प्रतिशोधरूपेण माम् इदानीं दारुण-कारणायाः पात्रं करिष्यन्ति इत्याशङ्कमानैः सावरकरैः तादृश-यातना-सहन-पर्याप्तस्य धैर्यस्य संग्रहार्थं कवच-मन्त्र-रूपा कवितेयं विरचिता । ]

अनादिमान् अनन्तवांस् तथाऽस्म्यवध्य एव च
क्व जात एव तादृशो रिपुर् य मां रणे वधेत् ॥

अहं हि धर्मधारणे रणे विशामि वेगतो
यदाऽन्तकस्य संमुखं समागमेच्छया स्वयम् ।
तदाऽनलो न मां दहत्यसिर् न वा छिनत्ति मां
भिया मदेव कातरः पलायतेऽन्तकः स्वयम् ।
मुग्धता रिपोरहो !
मृत्युमेव मे बिभीषिकां चिकीर्षति ॥ १ ॥

हिंस्र-सिंह-पञ्जरेऽपि मां निपातयेर् यदि
विनीत-दासवत् लिहीत मे पदाङ्गुलीरसौ ।
ज्वाल-चक्र-मध्यतश्च मां क्षिपस्यथो यदि
दूरतोऽपसृत्य तत् सुशीतल-प्रभं भवेत् ।
क्रूरसैनिकास् तवानयन्तु ते शतघ्निकाः
पावकं वमत्विदं च यन्त्र-तन्त्रवद् दलम्
हलाहलं शिवो यथा
सर्वतो निगिल्य वो हि जीर्णतां नयान्यहम् ॥ २ ॥

# १. मूर्ति दुजी ती !



अपरिचित न जो तुझिया मधुर विलासा :
रम्य सरें तीं, नलिनें, नाल सुभग ते,
ते सुगंध भृंगगुंज, त्या सुमंजुला
सारंग्या, गीतें तीं गोड, गोड ती
दयित-स्मृति आलिंगन जीस तृप्तवी,
शेती ती हिरवी, आल्हादिते मळे,
सरितापुलिनोत्थ थंड तीं कलिंगडें,
मुक्त नील आकाशश्री मनोहरा,
मुक्त नील सागरतळ, मुक्त वायु ते,
राजमार्गी भक्तीच्या गजर गोड वा

# ९. द्वितीया मूर्तिः

[ १९१० ख्रिस्ताब्दे फ्रान्स-देशात् आङ्ग्लभूमिं निवृत्ताः श्री. सावरकराः बन्दिग्राहं गृहीताः। तेषु दिनेषु अतीव तीव्रम् आसीत् शैत्यम्। जलाशयस्थ-जलेन सह शरीरस्थ-रक्तस्यापि श्यानीभावः प्रत्यासन्न इव प्रतीयते स्म। एतस्याम् अवस्थायां निजं मनः स्थिरीकर्तुं तच्च वज्रसारीकर्तुं यो विचार-वह्निः हृदये तैः प्रदीपितः स एव कालान्तरेण अन्दमाने एतत्पद्यरूपेण साकारः संजातः। ]

नास्मि यो ह्यपरिचितस् तव मधुरविलासानाम्
--तानि रम्याणि सरांसि, सुभगनालानि च नलिनानि
तानि सुगन्धीनि भ्रमरगुञ्जितानि
ताः कल्याण-प्रक्वणा वीणाः, ते च मधुर-मधुरा गीतिरवाः
मधुरा च सा कण्ठाश्लेषप्रणयिनः वल्लभजनस्य स्मृतिः
तानि सस्यश्यामलानि केदाराणि, ताश्च आह्लादयित्र्यः
फल-वाटिकाः
सरित्पुलिनोत्थितानि च तानि शीतलानि वालुकाफलानि
आकाशश्रीश्च सा मुक्त-नील-मनोहरा
ते च मुक्त-नीलाः सागरतलाः
ते सुखस्पर्शाः मन्दानिलाः
राजपथे च भक्तैः श्रूयमाणः तालमृदङ्गानां हरिनाममत्तो
मधुरगम्भीरो घोषः

टाळमृदंगांच्या हरिनाममत्त तो,
चन्द्रबिम्ब शारद मेघांत धावतें,
आशा कीं रिक्त संशयांत सुखभरें:
ऐसें जें नव, संगत, मंजु, मुक्त जें
त्या त्यांतिल मधुर विरामासि जो तुझ्या
मूर्तीच्या लावण्यश्रीस वर्णिना
भाटचि तो लंपट तव : देवि ! तोहि मी
आजि अहह इच्छिनसें रूप देखण्या
तें दुजेंचि तव ! तव ती मूर्ति दुजीची !

मूर्ति मधुर ना परन्तु ती भयंकरा
तव दुसरी घोर मूर्ति दावि ती मला !
कारण तूं बघसि कां न आजि मज इथें
ऐशा ह्या लोह-पिंजऱ्यांत कोंडिला
हिंस्र कुणी पशु जैसा वध्य तसाची;
आणि ऐकशो न काय लोक पहा ते
परस्परांसि जे कथिती दावुनी मला :
" असता हा हिंस्र कुणी पशुचि कीं क्वचित्
टिकना या पिंजऱ्यांत—वीर वा कुणी
हा तो परि केवळ कवि भावकोंवळा;
शोभेची मात्र वस्तु ! शयन रंगणीं
विजयायुध वीणाची; म्हणुनि कां कधीं
विजयायुध ती होई समररंगणीं ?
कसली ती कविता सुखभोग-लोलुपा
दाविल ना ह्यास इथें तोंडही पुन्हा

शारदेषु मेघखण्डेषु धावमानं चन्द्रबिम्बम्
मनोरथ इव मुक्तसंशये मानसाकाशे
—यद् यद् नवीनम्, यद् यद् च संगतम्
यद् यद् च मञ्जुलम्, यद् यद् च मुक्तम्
तत्तद्वस्तुहृदयभूतान् सर्वानपि मधुरविलासान्
—सश्रीकृतां तव लावण्यमूर्तेः—
त्वदेकनिष्ठो वैतालिको यः सानन्दम् उपवर्णितवान्
सोहम् इच्छाम्यद्य प्रत्यक्षीकर्तुं तव अन्यदेव रूपम् :
तां तव द्वितीयां मूर्तिम्

मधुराम्? न हि न हि, अपि तु भयंकराम्
ताम् अदृष्टपूर्वां दर्शय मेऽद्य मूर्तिं विकरालाम्
ननु पश्यस्येव माम् अवरुद्धं लोहपञ्जरे
वध्यमिव कंचित् हिंस्रश्वापदम्
किं न शृणोषि यदाहुर् मां लक्ष्यीकृत्यैते;
"यदि खल्वयम् अभविष्यत् हिंस्रपशुः कश्चित्
कश्चिद् वा वीरः
असहिष्यत तर्हि कठोराः कारागृहस्य यातनाः
अयं तु केवलं कविः !
कुसुमकोमलः, भावविवशः,
दर्शनैकफलं वस्तु !

भवतु नाम वीणा विजयायुधं शयनमञ्चगत-मदनरणे
न हि न हि कदापि तु तथा विकराल-समराङ्गणे
धिक् तां कविताम्, सुखोपभोगलोलुपाम्
न दर्शयिष्यति या अधुना मुखमात्रमपि अस्मै

नसता कवि सहृत तरी; हा तगेल ना ! ”

कां ? कविता काय कुणी पण्य अंगना
कीं जोंवरि उत्सवीय मनविमोहका
सुवर्णरत्न मौक्तिकांत तनु अलंकृता
तोंवरीच मात्र हात हंसत धरूं ये ?
आणि सुदैवाच्या आकस्मिका अशा
दुष्काळीं, पुष्करिणी शुष्कसलिल कीं
तेंवि रिक्तरसगव्हर हृदय तिचेंही
होउनि ती होत हात हिसडुनी दुरी ?
ना, ना, ना ! कुसुमसुगंधीय लाघवी
तारेवरि वीणेच्या नाचतीं मुदें,
तींच तिचीं होउनियां वज्र-कर्कशें
धारेवरि खड्गाच्या नाचतीं पदें !
ना ! कविता निजभक्ता त्यागिना कधीं !
भक्त तिला त्यागो, ती त्यागिना तया !

कारण कीं मूर्ति तिच्या असति दोन ज्या
कर्तव्या अनुसरुनी रक्षिती तिच्या
पूजकासि वा प्रियासि समयिं विभिन्ना,
एक मूर्ति ती : नाचत हृदयमंचकीं
रसिक मनाची वीणा घेउनी करीं
तंतुतंतुनि कुशल-स्पर्श-पुलकिता
प्रेमाची वीज थराहूनि देत जे;
भावनासि मोहन घालूनि ती करी
लोण्याहुनि कोमलशा—कोमला अशा

अकविश्चेद् अभविष्यत् क्लेशसहिष्णुर् अयम्".

कथम्! किं कविता नाम एका केवल-पण्याङ्गना
या तावन्मात्रमेव सानन्दम् आत्मनः हस्तं ग्राहयति
यावत्पर्यन्तं वर्तते मणि-काञ्चन-मुक्ताभिर् अलंकृतिः
आह्लादनीया, विलोभनीया?
या च सहसैव विप्रतीपतां गते विधौ, भवति रिक्तरस-गह्वर-हृदया
—अनावृष्ट्याम् इव पुष्करिणी
विमोच्य च निजं हस्तम् अपगच्छति दूरम्?
तन्न, तन्न!
कुसुमामोदसुरभिषु यानि आनन्दनिर्भरं लास्यम् अनुतिष्ठन्ति वीणातन्त्रीषु
तान्येव तत्पदानि वज्रसारीभूय भैरवं नृत्यन्ति खड्गधारासु
न हि! न हि! कविता न कदापि प्रत्याचष्टे अनुरक्तं निजभक्तम्
त्यजेत् कदाचित् भक्तो निजदेवताम्, न तु देवता निजभक्तम्
कुभक्तो जायेत क्वचिदपि कुदेवी न भवति

यतो हि तस्या वर्तते मूर्तिद्वयम्
यत् कर्तव्यानुसारेण रक्षति
तस्याः भक्तं वा वल्लभं वा
तेषु तेषु कालविपरिणामेषु
एका तावन् मूर्तिः—
या हृदय-रङ्गमञ्चे नरीनृत्यमाना
रसिक-मनोवीणा-दण्ड-मण्डित-करा
यस्यास् तन्त्री तन्त्री जनयति कुशलस्पर्शपुलकिता
विद्युल्लहरीम् इव अनुरागस्य;
या च स्नेहनवशाद् नवनीततोऽपि मृदुलतमाः करोति भावनाः

कीं जाळ्या चांदण्यामधेंहि वितळुनी !
आणि दुजी ती : मूर्ति प्रखर जी तुझी
कविते घेऊनि शिरे वाण सतीचें
अहह ! हास्य करित प्रज्वलित चिताग्नी !
प्रथम मूर्ति तव; यमुना-पुलिन भिजुनि जैं
चांदण्यांत शीतळ त्या रात्रिं जाहलें,
त्या रात्रीं कमलनयन श्यामसुन्दरा—
सहित रासलीलेमधिं गुप्त गोड्शा
हृदयाहृदयासि नाचनाचवी मुदें;
आणी आनंदाच्या किंकिणीप्रती
हास्य-लास्य-मग्न-गोपिका-हृदांतल्या
ताल धरित मंजुळ रुणु झुणुं झुणूं झुणूं !

* * *

परि यमुना-पुलिनीं रसभरित कीं अशा
त्या कवळ्या नंदकिशोराचिया मऊ
लुसलुशीत अधरांवरि मधुर होतसे
मुरली जी, तीच अहा त्याच कोमला
अधरांवरि कर्कश रणशृंग होउनी
रणवेताळाच्या वेताळ-तांडवा
ताल पिटी भारतीय त्या रणांमधें
“ अच्छेद्यो ऽयमदाह्यो ऽशोष्य एव च,
लोकक्षयकृत् प्रवृद्ध काळ, काळ मी ! ”
दंष्ट्रा विक्राळ, गर्ज भयद कोण तो
कविते, तव !—जो सहस्र वत्सरातुनी
घुमत येत आजहि, हें भुवन कंपवी !

चन्द्रिकायाम् अपि विलयनशीलाः!
द्वितीया तु मूर्तिः—
उग्रस्वरूपा, कलित-सतीव्रता
सधीरहासं प्रविशन्ती प्रज्वलज्ज्वालजालं चिताग्निम्!
प्रथमा मूर्तिस्तु:
यामिन्यां तस्यां ज्योत्स्नास्नातम् आर्द्रार्द्रशीतलं च समपद्यत
यदा यमुनापुलिनम्
यामिन्यां तस्यां नर्तयति क्षणे क्षणे हृदयं हृदयम्
कमलनयनश्यामसुन्दरेण सह रहो ऽनुष्ठीयमानायां मधुर-
मधुरायां रासलीलायाम;
हास्य-लास्य-मग्नानां च गोपिकानाम् हृदिस्थम् आनन्द-
किङ्किणी-झङ्कारम् अनु तालं धारयति मञ्जुलम्:
झनन् झनन् झनन् झनन्

* * *

या तु यमुना पुलिने सुकुमारस्य नन्दकिशोरस्य सरससरसे
कोमलतमे अधरे मधुरं स्वनति वंशी
तस्मिन् एव मृदु-मृदुले अधरे, सैव वंशी
कर्णकर्कश-रणशृङ्गीभूय रणवेतालस्य भैरवताण्डवम् अनुन-
नदति
भारतीये तस्मिन् समरप्रसङ्गे
'अच्छेद्यो ऽयम् अदाह्यो ऽयम् अक्लेद्यो ऽशोष्य एव च'
'कालो ऽस्मि लोकक्षयकृत् प्रवृद्धो
लोकान् समाहर्तुमिह प्रवृत्तः।'
ता भयानकाः करालदंष्ट्राः
गर्जितरवश् च स ते महान् उपजनित-भयकम्पः
यः सहस्रसहस्र-संवत्सरेभ्य आरभ्य अद्यापि श्रूयते अनु-
नाद्यमानो धीरगम्भीरध्वनिः
कम्पयन्निव भुवनत्रयम्!

—त्या छंदीं, त्या वृत्तीं समरभीषणा
प्रकटित तव चंडमूर्ति जी दुजी अहा
देवि, आज देवो मज तीच दर्शना !
कारण कीं भिन्नचि हें उदित आजला
कर्तव्य क्रकच-तीक्ष्ण ! आज ना असे
तन्मुद्रा स्मितशुभ्रा, वेष सौम्य ना
जरतारी थाटमाट रंगराग वा
रत्नखचित मुकुटहि तो आज ना दिसे
वाद्यें ना मंगल, ना गीत-मंजु ते
ताफे रंगेल नव तमासगिरांचे !
आज दों दिशा न पथांतूनि आवळी
भवनांच्या वर्षती फुलें; न हर्षती
ललनांचे लोलनयन; गर्जतीहि ना
लोकसंघ जयजयध्वनी कृतज्ञ ते !
आजि सेवकांसि नसे पारितोषिकें
वांटित ये सोन्याचीं आमुचा धनी—
स्वयंसैनिका त्याच्या आज अवधि वा
मिळते ना क्षणही कीं स्वेच्छ विलासा
' अशिथिल-परिरंभीं परिमृदित-मृणाली—
—दुर्बलशा अंगकां'सि लगटुनी कुण्या
अविदितगतयाम यामिनीसि न्यावया !
आज उलट सर्व ! उग्र, ना—हिडिस्ससा
लोखंडी जबडा वांसूनि आपला
कर्तव्य प्रगट आज ! मज चिरावया
दांतांच्या कवळ्यांच्या करवतींत दों !

या ते द्वितीया समरभीषणा मूर्तिः तदानीम् आविर्भावं गता
तादृशे छन्दसि, तादृशे वृत्तबन्धे
सैव चण्डमूर्तिः, अयि शारदे! दर्शयतु अद्य मह्यम् आत्मानम्
आत्मना!

ग्रन्थालय 70098

यतो ऽस्त्यद्य अन्यदेव कर्तव्यम् आपतितम्
खरतर-कराल-क्रकच इव सुतीक्ष्णतरम्
नास्त्यद्य तन्मुखं स्मित-मण्डल-मण्डितम्
न स्वर्णाद्यलंकृतो नानावर्णभूषितो नयनसुभगो वेशः
न मङ्गलानि वाद्यानि
न वा मञ्जुलकण्ठानां शृङ्गारनिरतानां नट-नर्तक-गायकानां
वृन्दानि
न वर्षन्त्यद्य उभयतो राजमार्गं पुष्पवर्षं प्रासादपङ्क्तयः
न वा सन्ति आनन्दनिर्भराणि ललनानां लोल-विलोचनानि
न गर्जन्ति जयशब्दैः कृतज्ञतामुखरा जनसंमर्दाः
न चागच्छत्यद्य अस्माकं स्वामी
अनुष्ठित-महाकार्येभ्यः सेवकेभ्यः सुवर्णपारितोषिकाणि वितरन्
नास्त्यद्य स्वयंसैनिकस्य क्षणमात्रोऽपि नियतकर्मणो विरामः
स्वच्छन्दतो विहर्तुम् :
परिमृदितमृणाली-दुर्बलाङ्गकायाः दयितायाः अशिथिल-परिरम्भे
अविदितगतयामां कामपि रात्रिं नेतुम्

—अद्य सर्वं विपरीतम्!
अद्य व्यादाय कालायसं करालमुखकुहरम्
न केवलम् उग्रम्, अपि तु बीभत्सम्
दंष्ट्रावलि-क्रकचद्वयेन मां खण्डशः कर्तितुम् उद्यतम्

दगडाहुनि निर्दय हें हृदय तयाचें
वेषही न वर्बरता झांकि अशी ही
त्याच्या अजि नंगी तरवार तनूची !—
आणि बाप रे ! थंडी ही भयंकरा !
निर्दयतेहूनि थंड थंड ! गोठलें
नदनदींत पाणी ह्या आणि शरीरीं
रक्तपिंड पिंड अहो जात थिजोनी !
या भयाण एकलकोंडींत एक ह्या
निःसहाय, निंदित, मी बघतसें स्वयें
जीवनरस नाड्यांतुनि माझिया अहा
थंड पडत जातांना ! दगडचुन्यांच्या
या नंग्या अंधाऱ्या भितिच्याहुनि
गार गारठा अंगीं असह भरुनि ये
कारेच्या कोठडींत नागव्या अशा
नंगें कर्तव्य असें मजसि गांठतें !
आणि अधांतरिं शिखरावरति वायुच्या
संभाळुनि तोल सतत चढत धावण्या
आज्ञा मज दे! पाठीवरति लादुनी
पर्वतसम दुर्धर सद्गर्वभार हा
राष्ट्राचा अखिलाची ! ये तरी अहा
तूंहि! तुझ्या त्या दुमन्या चंडमूर्तिचें
दर्शन मज दे! कविते, आजि दुजा तो
छेड सूर कर्कश, जो भिवविं भैरवा !
सूर ललित ना ! रुणुझुणु ताल तोल ना !
आवडते ज्याचे आघात कोंवळे

—एवम् अद्य आविर्भूतं वर्तते कर्तव्यम्
अश्मानमपि अतिशेते काठिन्येन यस्य हृदयम्
करालश्च विकोशः कटिबद्धः करवालः,
बर्बरता-गोपनोद्देशकस्य वेशस्य वफल्यम् संजनयन्.
अहो भीषणता शैत्यस्य !
सशरीर-निर्घृणतायाः अपि शिशिरतरम् !
शीनीभूतम् उदकं नदनदीषु एतासु
श्यायते च बिन्दुर् बिन्दुः शरीरे मे रक्तस्य !
स्थितो ऽहम् अस्मिन् भयानके शून्यशून्ये कारागारकक्षे
असहायः, निन्दितः
स्वयमेव पश्यामि शीतीभवन्तं धमनीषु मे जीवनरसम् !
शरीरे च प्रसरति सर्वतो दुर्विषहवेगं शैशिरम्
सुधाप्रस्तरमयीभ्यः तिमिरमात्रावरणाभ्यः भित्तिभ्यो ऽपि शीततरम् !
नग्ने ऽस्मिन् बन्दिगृह-प्रकोष्ठे आसादयति मां नग्नं कर्तव्यम् !
आज्ञापयति च अन्तराले वायुशिखरम् आरोढुम्
आरोप्य मम पृष्ठे पर्वतप्रायं निखिलराष्ट्रविषयकं सद्वर्वगुरुभारं दुर्वहम् !

एहि, कविते ! एहि त्वमपि
दर्शय त्वं मह्यं तव द्वितीयां मूर्ति–तां चण्डमूर्तिम् !
आस्फालय अद्य कर्णकर्कशं अन्यमेव स्वरम्
भैरवस्यापि भयप्रदम् !
माऽस्तु अद्य ललितस्वरविलासः, मा च मञ्जुमञ्जुलस् तालः
—ते गीतगोविन्दस्थाः छन्दोबन्धाः
सा ‘ मधुर-कोमल-कान्त-पदावलिः ’

हृदयकुंजिं नाचविती गोड गुल्गुल्या
मंजु गीतगोविंदांतील छंद ते :
अबलांच्या अबल हृदा अधिक अबल जे
करिती ते बिल्हणीय करुण छंद वा
परि, कविते, भेरीचे सूर ते दुजे
छेड आजि अबलांच्या अबल हृदांही
करिते जे प्रबल प्रलयोर्मि सिंधुसे !
मृत्युंजय मंत्र कुणी प्रकटवील जो

मूर्ति चंडिकेची उद्दंड, द्यावया
चंड मनोबळदाता मजसि वर अजी !
कुरळीं जे खेळावे, केश मृदुल ते,
क्रोधानें ताठराठ उठुनियां जवें,
फुटलेल्या पेंवांतुनि सर्प कीं तसे
बुचड्यांतुनि चवताळत सुटुनि धावती
स्कंधीं वा वक्षीं वा पृष्ठि वा मुखीं
विकराल क्रोधभरें अति भयंकरा :
एक्या निजहस्तेची छाटुनी स्वयें
खड्गानें आपलेंच मुंड फल तसें

अन्या निज हस्तीं घे : आणि अहो जी
रक्ताची धार उडे वरि उफाळुनी
लाल लाल चिकट विकट त्या गळ्यांतुनी
धार तीच घटघट त्या क्रुद्ध मुखें पी
पेल्यांतुनि लाल मद्य पी जसें कुणी !
पिउनि रक्त आपुलेंचि आपली तृषा
शांतवित्या त्या प्रचंड रौद्रभीषणा

मानससरसि कोमलाघात-जनित-'किमपि'-सुख-तरङ्गावलिः
अबलाजनस्य अबलं हृदयम् अबलतरं वा कुर्वाणानि
बिल्हणस्य करुणानि छन्दांसि.
आस्फालय, कविते, अद्य अन्यानेव तादृशान् स्वरान्
ये अबलानाम् अबलान्यपि हृदयानि प्रलयसागरोर्मि-प्रबलानि करिष्यन्ति
जप वा कंचित् उद्दण्डचण्डिकायाः प्रकटयितारं मृत्युंजयं मन्त्रम्
या वितरिष्यति कंचित् चण्डमनोबलदायिनं वरम्.
ये तव पवनलोला मृदुल-चूर्णकुन्तलाः
उत्तिष्ठन्तु ते क्रोधवशात् परुषपरुषा भूत्वा
धम्मिल्लमुक्ताश्च विसर्पन्तु इतस्ततः आवेशनिर्भरा
—सर्पा इव भग्नवल्मीकनिःसृताः—
स्कन्धे वा वक्षसि वा पृष्ठे वा मुखे वा
क्रोधमूर्छिताः, विकरालभीषणाः!
स्वहस्तधृत-खरतर-करवालेन विच्छिद्य निजमेव मस्तकम्
—यथाऽन्यत् प्राकृतं फलम्—
गृहाण तन्निजेन हस्तान्तरेण
या च सहसैव उद्गच्छेत् छिन्नगलविवरसंभवा रुधिरौघ-बहलधारा
घनशोणवर्णा, विकट-चिक्कणा,
तेन क्रुद्धमुखेन घटघटिति पिब तामेव रुधिरधाराम्
चषकेण इव अरुणवर्णां मदिराम्!
नमः प्रचण्ड-रौद्र-भीषणायै

रुंडधरा छिन्न-मुंड मूर्तिसी नमो
नमो नमः सहस्रधा प्रमत्त-नर्तने !
तूंची कर्तव्यमूर्ति ! तूं जरी अशी
सद्यःकर्तव्यमूर्ति मद्हृदा पुढें,
रुंडधरा, छिन्नमुंड, खंड-कृपाणा
ऐशीची मूर्ति धरुनि, तूंहि ये करूं
कविते ! या हृदयाचा पाठपुरावा !
जें वेताळीय काळभैरवीय जें
मारक जें, दुःसह जें, कठिण कटुकटू
तेंचि आज आरोग्यद, बलद हो तया !
कीं जैसें तें होई; अढळ जैं चढे
वीरवर श्रीबंदा वधशिलेवरी.

---

निज-रुधिर-पान-शमित-निज-तृष्णायै
रुण्डधर-च्छिन्नमुण्ड-मूर्तये नमः
नमो नमः सद्दरुधा प्रमत्त-नर्तने !
त्वमेव कर्तव्यमूर्तिः !
सद्यः कर्तव्यमूर्तिस्त्वमेव हे
रुण्डधर-च्छिन्नमुण्ड खड्गकृपाणे !
एहि एवं द्वितीयमूर्तिधारिणी
हृदयास्य मम बलाधानं कर्तुम्
यद्यद् वैतालम्, यद्यच्च कालभैरवीयम्
मारकं, दुःसहं, कठिनकठिनम्, नितान्तकटु
तदेवाद्य मम हृदयस्य पुष्टिकरं बलकरं च भवेत्
यथा ऽभूत्तद् वज्रस्तम्भारोहिणः वीरवरस्य बन्दा-सिंहस्य।

# १०. फुलबाग

फुलबाग किती शोभे लहान, नटवी, करी
नटुनी थटुनी नाना नखरे वरचेवरी;
हिरवाचि कधीं शालू, सित मलमलिचा कधीं;
रेशमी जरतारी वा जयाच्या पदरामधीं
नित्य ताजे जिते मोती पाच माणिक जन्मती;
पत्रनेत्र तसें त्यांसी नटवी डुलवी किती!
हांसतां कुंददंती ती जितमन्मथ मोहवी:
सुगंध सौम्य हास्याची ज्या चोरूनि नवी नवी
कला एकेक या लोकीं कामिनी सकला करी
निज मोहक लावण्या, तिजसी मुकुटा धरी!
नौकेंत कौमुदीच्या ही रतली कितिदां तरी
बाग योजन-गंधा त्या वनदेव-पराशरीं!

पथानें फुलबागेच्या दों बाजू सम शेवरी
आवली धरुनी होत्या डौलदार, यशें वरी
भाट बुल्बुल गातातीं; या शेंगा हिरव्या, फुलें
लाल हीं लटतां त्यांसी भासे चित्तांत चौफुले
जित्या माणिक पाचांचे जडवूनि मुठीवरी
तशा मरकतांच्या कीं म्यानांमाजि असी करीं
सदा लटकती ज्यांच्या, अशी सुंदर भीषणा
स्थापिली तरुणीसेना निजांत:पुररक्षणा
प्रतीहारी-पदीं का ही वसंतें! दे पिक स्वना
ललकाऱ्या पहाऱ्यांच्या ती ह्या क्षेमनिवेदना!

# १०. पुष्पवाटिका

प्रसाधन-स्वभावेयं शोभते पुष्पवाटिका।
शतधा ऽलंकृता तन्वी शतविभ्रमशालिनी ॥ १ ॥

कदाचिद् हरितं वासः कदाचिद् धवलांशुकम्।
परिधत्ते दुकूलं वा प्रोतं वा स्वर्णतन्तुभिः ॥ २ ॥

यस्याश्चलेषु जायन्ते जीवन्त्यो नित्यनूतनाः।
मुक्ता, अन्यानि रत्नानि पद्मरागादिकानि च।
पवनान्दोलितानीव नर्तितानि तया बहु ॥ ३ ॥

यस्याश्च कुन्ददन्ताया मृदुलं सुरभि स्मितम्।
विजेतुरपि कामस्य हरते प्रसभं मनः ॥ ४ ॥

नूतनां नूतनां यस्य गृहीत्वैकैकशः कलाम्।
सकलीकर्तुमिच्छन्ति लावण्यं मोहकं निजम्।
कामिन्यो रूपवत्योऽपि किरीटीकुर्वते च ताम् ॥ ५ ॥

ज्योत्स्ना-धवल-नौकायां रमते स च नैकदा।
स्वैरं योजनगन्धा या सार्धं वननिवासिना ॥ ६ ॥

वृक्षाः शाल्मलयो यस्या उभयोर् मार्गपार्श्वयोः।
बद्धरेखाः समाः सन्ति गाम्भीर्यसुभगास् तथा।
यशो यत्र च गायन्ति बन्दीभूता हि बुल्बुलाः ॥ ७ ॥

दीर्घाः शिम्बा हरिद्वर्णा लोहितानि सुमानि च।
यस्या, आलोक्य तां शङ्के तरुराजिर् इयं कुतः? ॥ ८ ॥

इयं हि तरुणीसेना रमणीया च भीषणा।
यस्या हस्तेष्विमे खड्गाः कोशे मारकते स्थिताः।
जीवद्-गरुत्मन्-माणिक्य-खचित-त्सरु-शोभिताः ॥ ९ ॥

—सेनेयं स्थापिता नूनं निजान्तःपुररक्षणे।
सार्वभौम-वसन्तेन प्रतीहारी-पदं गता ॥ १० ॥

रक्षिणां घोषवाक्यैः सा पिकस्वन-निरूपितैः।
कुरुते ऽधिकृतं तस्मै किमु क्षेमनिवेदनम् ॥ ११ ॥

मांडवी ही प्रवेशाची जाईनें विणिली जिला;
फुलें हीं हंसरीं येत्या आदरीतीं पलोपला !
फुलें ? अहा, फुलें ना तीं, उद्यानीं विहरावया
रात्रींत चोरुनी येतां अप्सरा धरिलें जयां,
नोंद त्या दिव्य पाप्यांचा ठेवूं जाइवरी असे
चुंबनांचेचि त्यांच्या घे देवी द्वारप हे ठसे !

वीथिका कदलींची ही उद्यानांतिल मर्मरी
तया सुरेखिल्या पाथाचिया दों तटिं शोभली,
येत्या-जात्यावरी मर्यादेनें आनतशा शिरीं
वारी विंजण वाऱ्यासी, आतपत्र अणी धरी
निर्गंधते करी क्षम्या नम्रता कर-जोडितीं
अशीं केळफुलें, गोऱ्या गोड केळफण्या किती,
दलें सुलोल हीं सारीं दाटतां मिसळोनि, ते
अव्यवस्थितशी शोभा बघुनी मनिं भासतें !
कालिंदी-पुलिनामाजी जयांहीं उपभोगिला
यथेच्छ वनमालीसी, पूर्त, तृप्त, सुशीतला,
भुक्तकामा, रतिश्रांता, आत्मा एक जयां हरी—
सखी म्हणुनि ज्या झाल्या, समतृप्त परस्परीं
विगतेर्षा म्हणूनी या—जातां वल्लभ त्याच का
अशा शून्यमना मार्गी उभ्या ह्या व्रजगोपिका
कंठांत एकमेकींच्या घालुनी करपल्लवा,
जातांही हरि तैशाची कुड्मलाञ्जलि, अन्य वा
लोल कोमल पंख्यांसी कुणी पालविनां करीं
गाला गालासि लावोनी मागली पुढती वरी

इदं च तोरणं जात्या गुम्फितं स्मेर-पुष्पया।
अतिथीं यत्र पुष्पाणि अर्चयन्ति क्षणे क्षणे ॥ १२ ॥

अथ वा नैव पुष्पाणि, चुम्बनाङ्का इमे खलु।
विना ऽनुज्ञां प्रविष्टानाम् उद्याने ऽप्सरसां निशि ॥ १३ ॥

रक्षिणीभिर् गृहीतानां दन्तलेखं चिकीर्षुभिः।
दिव्यानाम् अपराद्धानां युक्तं नाङ्गुष्ठ-चिह्नकम्।
जातीष्वतः कृतं नूनम् ओष्ठानाम् एव मुद्रणम् ॥ १४ ॥

इयं च कदलीवीथी उद्यानस्था सममेरा।
सुविभक्तस्य मार्गस्य पार्श्वयोः शोभिता बहु ॥ १५ ॥

नित्य-पालित-मर्यादा विनयानत-मस्तका।
वीजयत्यध्वगान् नित्यं छत्रं धारयते तथा ॥ १६ ॥

बद्ध-पुष्पाञ्जलिर् नम्रा मधु-गौर-फलोद्वहा।
नूनं क्षमापयन्त्येषा गन्धदारिद्र्यमात्मनः ॥ १७ ॥

दलानि सुविलोलानि घनसंमिश्रितानि च।
अव्यवस्थितशोभानि वीक्ष्य चिन्तयते मनः।
किमियं कदलीवीथी, उतैता व्रजगोपिकाः ॥ १८ ॥

कालिन्दीपुलिने रम्ये यथेष्टं वनमालिनम्।
या अभुञ्जत गोविन्दं, पूर्तास् तृप्ताः सुशीतलाः ॥ १९ ॥

भुक्तकामा रतिश्रान्तास् तुल्यं कृष्णैकजीविताः।
—अत एव गताः सख्यं समवृत्ताः परस्परम् ॥ २० ॥

अत एव विलीनेर्ष्याः—वल्लभे मथुरां गते।
शून्यचित्ताः स्थिता मार्गे तास्तथैव व्रजाङ्गनाः ॥ २१ ॥

अन्योन्य-कण्ठ-संसक्त-सुगौर-करपल्लवाः।
कुड्मलाञ्जलयोऽन्या वा विगतेऽपि जनार्दने ॥ २२ ॥

कस्याश्चिद् व्यजनं लोलं वीजयन्त्याः सुकोमलम्।
कपोलं निजमाधाय कपोलं पृष्ठवर्तिनी ॥ २३ ॥

हेमगौरमुखी कोणी सनाल अपुल्या सखी
स्कंधीं सखीचिया ठेवी पाठिशीं लगटूनि कीं ! !

शेवंती ही; हरीं गेला चढाई करुनी तदा
कुसुमाकर ही कल्पी ढाल कीं कुसुमायुधा !
आणि हे सोनचांफ्या, तूं शिकलासि तरी कुठें
ही दिव्य किमया ? आम्हां स्वयंमन्य नरां जिथें
रुप्याचेंही करायासी जड स्वर्ण न साधतें
ओल्या मातींत सूर्याचीं किरणें पिळुनी तिथें
मृदु चेतन सोन्याचीं, स्वर्णचंपक ! हीं फुलें
सुगंधी तुज पाहूनी निर्मितां मन हें भुले !
प्रियाच सोनचाफ्याची, चमेली किति ही खुले
तो तिच्यावरि, ती त्याच्यावरती उधळी फुलें !

जातिनें शुचिवर्णा जी, जी भूषा ललनाजना
याचकांच्या सदा झुंडी झुलती मधु-भोजना
दानशूर जिच्या दारीं, देवाच्या सुभगा पदा—
कीं शशी स्वकला तैशी शकलां तनुच्या सदा
अर्ची जी अर्पुनी;—साधूं स्वार्थ ? ना, लवलेश ना,
परीं केवळ कल्याणा लोकांच्या, मुनिसाधना
करूं सांग, तया देऊं मोक्षमुक्ति, पडे गळां
गौरी गौरीहराच्या जी निष्कामा-अजि तूं मला—
तया त्यां केतकीच्या, हे गंधवाह दिशा-दिशा
प्रसिद्ध गुणगंधाच्या करिसी धवला यशा
आणि मात्र यशातेंची ! खरी खोटी कशी परी
उक्ति कुत्सित कीं हीच्या भुजंग लपती घरीं,
अवाक्षरहि ना तीचें वदतां तुज तेंच कीं

हेमगौरमुखी काचित् सखी तिष्ठत्यनन्तरम् ।
सख्याः स्कन्धे ऽवसक्तेन निजस्कन्धेन चारुणा ॥ २४ ॥

हरं जेतुं प्रयातस्य नूनं शेवन्तिका इयम् ।
पञ्चबाणस्य चर्मासीत् कुसुमाकर-कल्पितम् ॥ २५ ॥

किं च चम्पक ! सौवर्ण, प्राज्ञंमन्या वयं नराः ।
जडस्वर्णस्य निर्माणे ऽप्यशक्ता रजताद् यदा ॥ २६ ॥

रसायनस्य दिव्येयं विद्या ऽधीता कुतस् त्वया ।
यदार्द्र-मृत्तिकायां त्वं सूर्यांशूनां निपीडनात् ॥ २७ ॥

स्वर्णचम्पक ! जीवन्ति सुरभीणि मृदूनि च ।
निर्मासि स्वर्ण-पुष्पाणि यत्र संसज्जते मनः ॥ २८ ॥

प्रियेव चम्पकस्यास्य मालती शोभते बहु ।
अन्योन्योपरि पुष्पाणि किरतस् तौ उभौ अपि ॥ २९ ॥

जात्यैव शुचिवर्णा या, या च स्त्रीजनभूषणम् ।
यस्याश्च दानशूराया मधुभोजन-लिप्सया ।
सदैव द्वारि तिष्ठन्ति महान्तो याचक-व्रजाः ॥ ३० ॥

शकलानि स्वकीयानि स्वकला इव चन्द्रमाः ।
ईश-पादाब्ज-पूजायै समर्पयति या सदा ॥ ३१ ॥

यस्यां न स्वार्थलेशोऽपि, लोकानां हितकाम्यया ।
साङ्गतासिद्धि-हेतोश्च मुनीनां तपसां तथा ॥ ३२ ॥

तेषां च मोक्षलाभो ऽस्तु इत्यनेनैव हेतुना ।
निष्कामाऽपि सती गौरी या ऽऽलिङ्गति सदाशिवम् ॥ ३३ ॥

केतक्याः प्रथयंस् तस्या गन्धवाह ! दिशो दश ।
सौरभस्य यशः शुभ्रं श्लाघनीयो ऽसि मे मतः ॥ ३४ ॥

यश एव च यत् तस्याः प्रख्यापयसि पावन ।
पवन ! त्वं न नामापि यद् गृह्णासि जनश्रुतेः ॥ ३५ ॥

गूढं तिष्ठन्ति यत् तस्या भुजंगा भवने इति ।
—सत्यं वा तदसत्यं वा—तत् ते श्लाघ्यतरं खलु ॥ ३६ ॥

पावना पवना, शोभे! स्वार्थविन्मुखता निकी
ही ज्यांची, मंगला लाखों लोकांच्या झिजती, जयां–
विना वसुंधरा व्हावी अल्परत्ना, अशा तयां
जगद्धर्मी महात्म्यांच्या गृहस्खलित म निती
स्पृहणीय न तत्रापि गोपनीयचि सन्मती!

पुन्हां हुडकितां मातें फिरे काय असा अतां
करुद्ध हा त्या त्रिनेत्राचा निजा नेत्रचि जाळिता;
पाहूनि भास्करा भारी खाई धास्ति अनंगही
कीं दुग्धें पोळली जिव्हा पी ते फुंकुनि ताकही
म्हणुनीच गमे नेमी मीनकेतन हा खुळा
गुप्तहेरचि सूर्याच्यावरी, सूर्यफुला, तुला!
तरीच तूं सदा डोळा टेवितोसि रवीवरी
अनंग तरिची दंगा भारी रात्रितुनी करी!
नाना बालतरू देशाविदेशांतिल आणुनी,
फुलें किती अशीं ज्यांचीं पानें रंगित देखणीं,
तशींच फुलझाडेंही विचित्र नटवीं किती,
कुंड्याकुंड्यांतुनी होती गुच्छांहीं रचिली पथीं
भंवतीं फुलबागेच्या वर्तुलाकृति रेखिले
तृणस्तबक जे गार हिरवे हिरवे खुले;
प्रभातीं तृणवेलींसी त्यांतल्या धवलीं अती
अती चिमुकलीं, लाखों फुलेंही फुलतां किती
मनोज्ञ तरि ती शोभा! यामिनींत, गमे हृदीं,
होती वहात जी येथें ज्योत्स्नेची रसिता नदी
प्रभातिच्या हिमें का ती घनीभवन घे नवें;–
चकाकती फुलें ना हीं, चांदण्याचे रवे रवे!!

मङ्गलार्थाय लोकानां घटन्ते ये सदा मुदा।
अत्यन्त-विस्मृत-स्वार्थाः सर्वभूतहिते रताः॥ ३७॥

यैर् विनेयं भवेन् नूनम् अल्परत्ना वसुंधरा।
वसुधैक-कुटुम्बानां तादृशां हि महात्मनाम्।
गृहच्छिद्राणि गूहन्ते प्राज्ञा नैवानुकुर्वते॥ ३८॥

अपि मां पुनरन्वेष्टुं गगने संचरत्यदः।
त्र्यम्बकस्य तृतीयाक्षि रोषाविष्टस्य दाहकम्॥ ३९॥

नूनम् इत्थम् अभूत् त्रस्तो भास्करं वीक्ष्य मन्मथः।
—दुग्धेन तप्तजिह्वो हि तक्रं फूत्कृत्य संपिबेत्॥ ४०॥

मन्ये ऽतः सूर्यपुष्प! त्वं मुग्धेन कुसुमेषुणा।
चरत्वेन नियुक्तो ऽसि सूर्य-व्यापार-वीक्षणे॥ ४१॥

अत एव सदा ऽसि त्वं बद्धदृष्टिर् दिवाकरे।
येन रात्रौ विशेषेण उद्दामं काम-चेष्टितम्॥ ४२॥

बालवृक्षास् तथा ऽनेके नानादिग्देशसंभवाः।
पुष्पातिशायि-सौन्दर्य-वर्णैः पर्णैर् विभूषिताः॥ ४३॥

त्रिविधाः शतभूषाश्च सपुष्प-तरुपोतकाः।
कुण्डे कुण्डे स्थिता मार्गे गुच्छाकारैः प्रकल्पिताः॥ ४४॥

निर्मिता वर्तुलाकाराः परितः पुष्पवाटिकाम्।
तृणानां स्तबकाः सन्ति हरितश् चित्तहारिणः॥ ४५॥

प्रभाते तृणवल्लीनां यत्र फुल्लन्ति कोटिशः।
शुभ्रशुभ्राणि पुष्पाणि अतिक्षुद्राकृतीनि च॥ ४६॥

मनोज्ञां वीक्ष्य यच्छोभां संभावयति मे मनः।
नेमानि शुचिपुष्पाणि, चन्द्रिकाशर्करा इमाः॥ ४७॥

वशीकरण-चूर्णासी देत त्यास तिला हरूं,
मंत्र गुंजत त्या भोगक्षमा ज्या कलिका करूं
ह्या पुष्पा वश त्या पुष्पीं करवीत परोपरी
हिचें चुंबन दे त्यासी, त्याचे देत हिला, अली
दयितादयितांमाजी सुमलोकांतल्या पहा
घाली खेपा मधावारी मदनाचा दलाल हा !

धोतऱ्याचीं महादेवा फुलांत रुचलीं फुलें,
गुणांवत्वहि मोठ्यांचें मोठेंचि असणें बरें !
फूल ह्या निशिगंधाचें ! हें अधीरवितें हृदें
कामसेनापुरोगामी रौप्यशृंगचि काय तें !

छोटेंसें स्फटिकांचें हें अष्टपैलु मधें खुले
लीलासर, सदा पूर्ण स्वादु शीतलता जलें;
कारंजें शतधारांचें कासारांत तया उडे
नर्तद्बिंदूवरी त्याच्या तेजोबिंब यदा पडे
तदा गमे असा लीलासरा उडत ये तया
थवा इंद्रधनुष्यांच्या पिलांचा विहरावया !

जलार्ध-मग्न-नाला त्या शोभती नलिनी, तशा
शोभती लाजत्या गोपी यमुनेंत तई जशा;
हृच्चोर पोर नंदाचा वसनें हरि ज्या क्षणा
आणि त्या प्रिय पाप्याच्या हट्टी तुष्ट करूं मना
शक्य तों नग्न तन्वंगें करूनि वरती जला
"दे न रे हरि, वस्त्रें तीं !" गोपी याचिति आकुला !

निशायाम् अवहद् या ऽत्र ज्योत्स्नाया रसिता नदी।
किं प्रभातहिमेनास्ति घनत्वं सा गता नवम् ॥ ४८ ॥

वणिजो मदनस्यायं भृङ्गः प्रतिनिधिः खलु।
मधु-लाभांश-हेतोर् यः कुरुते ऽत्र गतागतम् ॥ ४९ ॥

वशीकरण-चूर्णानि निपुणानि मनोहृतौ।
कलिका-लुब्ध-चित्ताय कुसुमाय ददत् क्वचित् ॥ ५० ॥

मन्त्रं भोगक्षमाः कर्तुं कलिकाश्च च जपन् क्वचित्।
कुसुमं च वशीकुर्वन् पुष्पेणान्येन कुत्रचित् ॥ ५१ ॥

अन्योन्यचुम्बनं चापि क्वचित् संक्रामयंस् तथा।
दूतकर्म करोत्येवं पुष्पलोक-विलासिनाम् ॥ ५२ ॥

सर्व-पुष्पेषु धत्तूरं 'हरवल्लभ'ताम् अगात्।
गुणान्धत्वम् अपि ह्यस्तु महदेव महात्मनाम् ॥ ५३ ॥

कुसुमं निशिगन्धस्य उत्सुकं कुरुते मनः।
कामसेनापुरोगं तद् रौप्यशृङ्गमभूत् किमु ॥ ५४ ॥

भ्राजते मध्यभागे ऽत्र अष्टास्रं स्फाटिकं तनु।
लीलासरः सदा पूर्णं स्वादु-शीतल-वारिणा ॥ ५५ ॥

शतधारं जलं यत्र यन्त्रधारागृहात् पतत्।
नृत्यद्बिन्दु-सहस्रौघ-प्रतिबिम्बित-भास्करम् ॥ ५६ ॥

क्षणमात्रं समालोक्य मनसो जायते भ्रमः।
इन्द्रचापशिशूनां किं व्रजः क्रीडार्थमागतः ॥ ५७ ॥

जलार्धमग्ननालाश्च शोभन्ते नलिनीव्रजाः।
यमुनायाम् अशोभन्त व्रीडिता गोपिका यथा ॥ ५८ ॥

हृच्चोर-नन्दपुत्रेण हरिणा हृतवाससः।
प्रियापराधिनस् तस्य चित्ताराधन-हेतुना ॥ ५९ ॥

उदतिष्ठन् यथाशक्यं यदा तोयाद् अनावृताः।
'देहि, रे! देहि वस्त्राणी'त्याकुलाः प्रार्थनापराः ॥ ६० ॥

—नायकेचि परी खोटा, "या तशाच" म्हणे "वरी !"
छंदें त्या कीं मृगी तैशा होत कर्षित सुंदरी [१२०]
आल्या तीरीं अहा, तीरावरी नवनवें तधीं
लावण्याचे पुटांतूनी पुट दिव्य पदोपदीं
घेत घेत विकासा जैं रविसी नमिती करें,
वायु निश्चेष्ट, सूर्याचे अंशु आनत, आदरें
करीत तइं जे देवप्रिय दर्शित जाहले
विश्वमोहन मद्याचे पेले, चेतन पोवळें
जीवनाच्या उषा ज्या, जीं हृदयें रतिचीं निकीं
प्रेमकल्प सुमें तीं हीं—फुलले न गुलाब कीं !

'कमला'

अंदमान

—नाभ्युपेत्याह धूर्तस्तु ' तथैवागम्यताम् ' इति ।
हरिण्य इव गीतेन आकृष्टा अभवंश्च ताः ॥ ६१ ॥

समारुह्य च तत् तीरं गोपिकाः कृष्णशासनात् ।
प्रारभन्त नमस्कर्तुं बद्धाञ्जलिपुटा रविम् ॥ ६२ ॥

तदा निश्चेष्टतां वायुं सूर्यांशून् भक्तिनम्रताम् ।
आविरासन् नयन्तो ये गोपीनाथ-बहुप्रियाः ॥ ६३ ॥

श्रियो नवनवोन्मेषा विकसन्तः पदे पदे ।
विश्वमोहन-मद्यस्य चषका, जीवि विद्रुमम् ॥ ६४ ॥

जीवितस्योषसो वा या, हृदयान्यथ वा रतेः ।
प्रीतिकल्पस्य पुष्पाणि–न गुलाबानि–सन्ति वै ॥ ६५ ॥

'कमला'तः

# ११. मरणोन्मुख शय्येवर

[ १९१९-२१ पर्यंत अंदमानमध्यें तुरुंगांत सावरकरांची एकसारखी प्रकृति बिघडत जात अंतीं क्षयावर जाते कीं काय अशी डॉक्टरांना देखील भीति पडली असतांना व केवळ थोडयाशा दुधावर राहून अंथरुणास वर्षावर खिळून पडले असतांना मरण बरें असें वाटूं लागे; इतकेंच नव्हे, तर तें एकदां अंथरुणाशीं येऊन ठेपलेंही! त्या वेळेस त्यांच्याकडून ही कविता लिहिली गेली. ]

ये मृत्यो ये ! तूं ये ! यावयाप्रती
निघालाचि असशिल जरि ये तरी सुखें !
कोमेजुनि जावया भिवोत हीं फुलें
हीं द्राक्षें रसरशीत सुकुनि जावया;
भ्यावें तें कां म्हणुनि तुजसि परी मी ?
माझ्या पेल्यांत किती पीत राहिलों
तरि न संपतीच अशा असति आजि या
अश्रूंच्या मदिराची मात्र राहिल्या !
ये ! नैवेद्या त्या जरि अससि भुकेला !

आणि जरी दिवस असे अजुनि तरुण हा
तरि लहान थोर अशीं असति संपलीं
दिवसाचीं कार्येंही बहुत करुनिया;
तोडजोड करुनि परी फेडलीं ऋणें
जन्मार्जित जीं जीं तीं; ऋषिऋणाप्रती
श्रुतिजननी-चरणतीर्थ सेवुनी कधीं,
धरुनि कधीं ध्रुवपदांसि संततींच्या.

# ११. मरणोन्मुख-शय्यायाम्

[ अन्दमान-द्वीपे वर्तमानानां सावरकराणां शरीरस्वास्थ्यं १९१९–२१ ख्रिस्ताब्देषु प्रत्यहं ह्रासं गच्छत् तथा क्षीणम् अभूत् यथा वैद्यानाम् अपि किमिदं राजयक्ष्मणि पर्यवस्यति इति शङ्का समजनि। अस्याम् अवस्थायां किंचिद्दुग्धमात्रेण यथाकथंचिद् अवलम्बितशरीरैः, रमणम् अपि शरणं मन्यमानैः, उत्प्रेक्षितागमनस्य मृत्योः सानन्दं स्वागतकरणाय सिद्धैश्च सावरकरैः काव्यमिदं व्यरचि। ]

एहि, मृत्यो ! एहि
प्रस्थितश् चेत् प्रागेव, सुखेनैव एहि.
सन्तु, यदि सन्ति, म्लानि-भय-शङ्कितानि
पुष्पाण्येतानि, रसघना वा द्राक्षाः
वेपन्तां नाम भयचकिताः उत्प्रेक्षणमात्रेण शुष्कीभावस्य.
कुतो वा मृत्यो मया भेतव्यं त्वत्तः ?
मम हि चषके विद्यते केवलम् अवशिष्टा
अश्रुजलानां मदिरा
निशि निशि अखण्डं पीयमाना ऽपि अक्षीयमाण-बहलधारा
एहि, चेद् वाञ्छसि त्वम् एतमपि नैवेद्यम्
एहि, मृत्यो ! एहि, सुखेनैव एहि।

अद्यापि अपरिणतम् अहः
समाप्तप्रायाणि तथापि उच्चावचानि आह्निकानि
यथाकथंचित् च अपाकृतानि जन्मसहभुवानि ऋणानि
विहाय किंचित्, संपाद्य किंचित्.
निष्कृतम् ऋषिऋणम्
श्रुतिजनन्याश् चरणतीर्थस्य सेवनेन कदाचित्
'सन्त'-ततेर् 'ध्रुव-पदानाम' आलम्बनेन कदाचित्

आणी ही आचरुनी एक तप अशी
आशेच्या या स्मशानभूंत तपस्या :
देवऋणा–फुंकुनि रणशृंग, दुंदुभी
धडड धडड पिटुनि, अणी तो अघाडिचा
चढवुनि तैं हल्ला सहसाचि ज्या पळीं
सुटली रघुवीराची प्रथम रणाज्ञा:
आणि त्याचि रणयज्ञाग्नींत पेटल्या
अस्थि अस्थि, मांस मांस इंधनें तशीं
जळत जळत आज असे शेष राहिली
राख यौवनाची मम ! आणि म्हणुनिची
फेडाया पितृ-ऋणासि आजि अहो मीं
शास्त्रातें अनुसरोनि, दत्तविधानें,
निपुत्रिकत्व वारियलें : पुत्र अखिल हें
अभिनव भारतची मम ! जेथ जेथ कीं
पाळण्यांत विलसतसे नयन कमल तें
तेथ तेथ मीच बघें सृष्टिकुतुहला.
ज्या ज्या स्मितमधुरमुखीं मधुर विलसतें
कैशोरी कोमलता, प्रेमपूर्ण कीं
तें तें मुख बघतांची हृदयिं माझिया
वत्सलता ये उचंबळोनि, आणखी
नवउन्नति शील भालपटलिं दिसत जें
उदयोन्मुख तेज तरुण, तैं पुनः पुन्हां
माझ्याही उदयोन्मुख होति हृदीं या
आशा नव, आकांक्षा उच्च, भावि त्या
आमुचिया वंशाच्या गौरवाचिया–

समग्र-द्वादशवर्ष-पर्यन्तं च चीर्णेयं कठोरकठोरा तपस्या
मनोरथानां श्मशानभूमौ·
देवऋण-शोधनाय आध्मातं रणशृङ्गम्
आहतश्च अम्भोद्-गम्भीर-ध्वनि-दुन्दुभिः
अनुष्ठितं च शात्रवोपरि अग्रेसरम् अवस्कन्दनम्
विसृष्टमात्रे रघुवीरस्य ' अवस्कन्द ! ' इति निदेशे·
यस्मिंश्च रणयज्ञे शनैः शनैः समिद्भूतम् अदहत्
मम एकैकम् अस्थि, एकैकश्च मांसपिण्डः
अवशिष्टम् इदानीं केवलं भस्मावशेषं यौवनम्·
एहि, मृत्यो ! एहि, सुखेनैव एहि ।

अपुत्रस्य मे पितृऋणं तु तदवस्थमेव आसीत्
प्रत्यर्पणार्थं यस्य क्रियते ऽद्य मया यथावद् दत्तविधानम्ः
अयं मे पुत्रः —
अखिलं भारतम्, अभिनवं भारतम् !
यत्र यत्र विकसति शिशुदोलायां प्रत्यग्रं नयनकमलम्
तत्र तत्र प्रत्यक्षीकरोमि सृष्टि-कुतूहलम्
यत्र यत्र विलसति स्मितं मधुर-मुख-मण्डले
कैशोरी कोमलता प्रेमनिर्भरा
तत्तन्मुखचन्द्र-प्रेक्षणेन
उच्छलति हृदये मे वात्सल्यसिन्धुः
यदा यदा च पश्यामि उदयोन्मुखं तेजसो बीजम्
नवनवोन्नतिशीले भालपटले
तदा तदा ममापि हृदि भवन्ति उदयसाकाङ्क्षाः
नूतना आशाः, नूतना आकाङ्क्षाः
उत्प्रेक्षमाणा भावि-गौरवं वंशस्य अस्मदीयस्य

भारतीय केवळ ना मानवीयही
वंशाच्या गौरवार्थ ! तरुण कोंवळीं
सर्व मुलें माझीचीं ! अखिल मानवी
यौवनांत अनुभवीन यौवनास मी.
आणि पितर माझे ते प्रेमतर्पणा.

येइं सुखें मृत्यो तरि – असति हीं अशीं,
तोड जोड करुनि परी फेडिलीं ऋणें
आणि बहुतकरुनीया असति संपलीं
दिवसांचीं कार्यें हीं : यद्यपी कधीं
उगवे हा दिवस, कधीं मावळेहि वा;
कर्में वा कवण, कशीं कार्य या दिनीं,
याविषयीं पंचांगें भिन्न, भिन्नची
भट्ट आणि पंडित हे कथिति मज कथा;
तरिहि लोकसंग्रहार्थ, धारणाप्रती
मानवीय आत्यंतिक आत्महिताच्या,
सज्जनासि गमलीं अनुकूल तींच कीं,
कार्यें म्यां धर्म्यें अशीं मानिलीं; अशी
तदनुरूप एकाचा म्हणुनि जो टरे
म्यां माझा भार असे उचलिला मुदें,
यथाशक्ति यथापरिस्थिति, न भंगितां
धरिलें तें व्रत कदापि किमपि ना भयें

सत्कुल; अव्यंग देह; परम दयाळू
जनक आणि जननी ती; त्याहुनीहि कीं
वात्सल्यें, पुण्यें, प्रतिपाळिता तसा

न केवलं भारतीयस्य, अपि तु निखिल-मानवीयस्य।
निखिल-मनुज-जातेरेव यौवने अनुभविष्यते
मयापि निजयौवनं, पितृभिश्च मे श्राद्धतर्पणम्।
एहि, मृत्यो ! एहि, सुखेनैव एहि।

यथाकथंचिद् एवम् अपाकृतानि जन्मसहभुवानि ऋणानि
विहाय किंचित्, संपाद्य किंचित्
समाप्तप्रायाणि च उच्चावचानि आह्निकानि कृत्यानि
यद्यपि भिद्यन्ते शास्त्राणि, विवदन्ते च पण्डिताः
कदा वा उदेति जीवितदिनम्, कदा च अस्तमेति
कानि वा कार्याण्यत्र, कथं वा करणीयानि
इत्यत्र विषये; तथापि
धर्म्यत्वेन स्वीकृत्य तानि तानि कर्माणि
यानि यानि सज्जनैर् अनुकूलानि मतानि
लोकसंग्रहार्थम्
आत्यन्तिकाय च आत्महिताय निखिलमानवकुलस्य
—धर्म्यत्वेन स्वीकृत्य तानि तानि कर्माणि
स्वेच्छयैव अवहम् एकपुरुषानुगुणं भारम्,
यथाशक्ति, यथापरिस्थिति।
सकृच्च अङ्गीकृतं व्रतं पारितवान् अभङ्गम्
एहि, मृत्यो ! एहि, सुखेनैव एहि।

अस्ति वा किमपि अनासादितं मया?
सत्कुले जन्म, अविकलो देहः,
परमकारुणिकौ मातापितरौ;
अतिशयित-तद्वात्सल्यश्च प्रतिपालयिता अग्रजः

अग्रज, जो अग्रगण्य तापसांमधें;
मूर्त विनय अनुज असा; आद्वितीयसें
प्रेयांचें प्रेम पुण्य; धन्य आणि तें
ध्येय महत् , देई जें जीवनाप्रती
सार्थकत्व मनुजांच्या, काव्यमय करी
जें आयु:कालातें, पूत चरित्रा;
तप कांहीं, जप कांहीं, यश कांहीं तें,
कांहींशी मान्यताहि शारदेचिया
राजसभेमाजी कविरत्नभूषिता;
चाखियले रस नाना; हुंगियले ते
शतभूजलवायुललित शतसुगंध कीं;
पंचाग्नीमधिल तया प्रखर भाजत्या
उत्तापापासुनि तों प्रीतिच्या मऊ
स्निग्ध परिष्वंगापर्यंत सर्वही
शीतल, शीतोष्ण, उष्ण, अनुभवीयले
कटिबंध-स्पर्श तसे; परिसले किती
स्वरशत, शतभाषा, शतगीति नवनवा
शतमंजुल कंठांतिल—आणि मृत्युच्या
शतकठोर कंठांतिल घोर लागल्या;
नानाजन, जानपदें, जाति विभिन्ना
देश किती, दृश्यें तीं भूमिच्या महा—
संग्रहालयांत परिभ्रमत पाहिलीं.
सुरूप तें, सुरेख तें, सुललित तें असें
पाहियलें डोळ्यांनीं किमपि तरि जया

तपोधनानां धुरि कीर्तनीयः;
शचीव विनयो यवीयान् भ्राता;
अद्वितीयं च प्रेमपुण्यं वल्लभस्य जनस्य;
पावनं च जीवनोद्दिष्टम्, यत्
सफलं वितनोति पुरुषजीवितम्, रमणीयं जीवितावधिम्.,
पुनीतं च चरितम्
ईषत् जपः, ईषत् तपः
ईषत् च यशः, ईषत् च मान्यता
शारदायाः सभायां कविरत्न-पदलाञ्छिता.
आस्वादितं रसशतम्,
शत-भूजलवायु-ललितं च आघ्रातं सुगन्धशतम्,
शतशश्च अनुभूताः 'कटिबन्ध' स्पर्शाः
शीतोष्ण-सुखदुःखदाः
आ पञ्चाग्नीनां प्रखर-दाहकाद् उत्तापात्
आ स्निग्ध-मृदुल-कोमलात् प्रीतिपरिष्वङ्गात् शीतलात्;
नीतं च श्रवणगोचरताम्
स्वरशतम्, भाषाशतम्
शत-मञ्जुलकण्ठ-विनिर्गतं च नवनवं गीतिशतम्
—शत-करालकण्ठकुहर-गर्जितं च मृत्योस् तर्जनशतम्;
शतशश्च प्रत्यक्षीकृतानि
नाना-जनपदानि, विविधाश्च जातयः
अनेके भूप्रदेशाः आलोकशतभूषिताः
जगन्नाम्नि महासंग्रहालये परिभ्रामयता मया;
यद्यत् सुरूपम्, यद्यत् सुभगम्, यद्यत् सुललितम्
अवलोकितं तद् अनेन नयनयुगलेन

मराठी ग्रंथ संग्रहालय, ठाणे. स्थळप्रत.

मृत्यो ! ते डोळे हे झांक तूं सुखें,
–झांकणेंचि आवश्यक जरि गमे तरी
कीं सुरेख पाहियलें–किमपि परी तें !
प्रीति विपल : विरह चिरंतन ! नवीं वयीं,
प्रौढ धुरंधरहि न जी शकति तोलण्या,
तीच धुरा भर उन्हांत तोलणें घडे !
म्हणुनि असे अजुनी अपुरीच राहिली
खेळाची हौस हंसत चांदण्यामधें
या आयुष्याच्या मम ! तरिहि जाणुनी
कीं न ययातीची ही हौस पुरेशी
झाली जरि आयुष्याचाचि सर्व तो
नृपति करी खेळ एक; आणि पाहुनी
इच्छेच्या बीजा फल भोग लागतां
इच्छेचीं बीजेंची त्यांत फिरोनी;
आणी अनुभवुनी कीं एक भुकेची
एक जेवणानें जी तृप्ति जाहली
तृप्ति सहस्राव्याही भोजनामुळें
असते कीं तितुकीची आणि तशीची;
मी दे तुज अनुमोदन संपवूं असा
हा जीवनलेख इथें; पृष्ठिं या; जरी
पृष्ठें जीं पुढलीं तीं मागल्या तया
पृष्ठांची असली पुनरुक्तिची तरी !
म्यां असतां दिवस नसे व्यर्थ गमविला
दिवसास्ताचेंहि म्हणुनि दुःख ना मला.
–भीति उद्यांचीही वा ! मृत्युच्या मृता

पिधेहि तन् मृत्यो !—अवश्यं चेत् पिधेयम्—
सुभगदर्शनेन लब्ध-जनि-फलम्
क्षणमात्रः संगमः–चिरंतनो विरहः.
प्रौढैर् अपि धुरंधरैर् अशक्या या वोढुम्
नवे वयस्येव मम वोढव्या ऽऽसीत् प्रचण्डा सा धूः
ललाटंतपे तपति चण्डांशौ;
वञ्चितैव येन अद्यापि चिरसंचिता अभिलाषा
आनन्दनिर्भरम् अनुभवितुं जीवनज्योत्स्ना-केलिकौतुकम्
एहि मृत्यो ! तथापि

एहि, मृत्यो ! तथापि,
यतः जानामि खलु अहं यत्
एककेलीकृत-निखिलजीवितस्यापि ययातेर् नृपस्य नैव तृप्तिं ययौ क्रीडाभिलाषः,
यतश्च पश्याम्यहं यत्
तृष्णा-बीजस्य फलायमाने भोगे पुनरपि आविर्भवति तृष्णा-बीजम्
[ 'न जातु कामः कामानाम् उपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ ' ]
यतश्च मया अनुभूतं, यद्
सकृद्-भोजनेन भवति या क्षुधायाः शान्तिः
तावन्मात्रैव तथैव सा सहस्रतम-भोजनेनापि
एहि, मृत्यो ! अतः अनुजानामि त्वां समापयितुं मे जीवितलेखम्
अत्रैव पृष्ठे,
अग्रिमाणि पृष्ठानि चेन् पूर्वकाणां पुनरुक्तिमात्राणि स्युः

न मया व्यर्थमेव यापितः जीवितदिवसः
अतश्च नास्ति मे दिनावसान-जनितं दुःखम्
न वा अनागत-दिनाद् भयम्
यदि कदाचित् स्यात् दिनान्तर-पुष्पोद्भेदः अन्धकार-महालतायाः

जरि असेल त्या अंधःकार-लतेला
फुलत दुज्या दिवसांचें फूल—तरी ही
भीति न मज; कीं येथें पेरिलें अम्हीं
फुलत आणि फलत तेंच, कथिति ते, तिथें
आणी मी पेराया कष्टलों असें
बीजें कीं तीं तीं जीं निवडुनी दिलीं
त्यांनींची अत्युत्तम म्हणुनिया मला
पेरुं फलाशाविरहित. "तूं तसें जरी
वर्ततील समपरिस्थितींत अन्यही,
तरि लोकोन्नति-विनाश होय ना असें
वर्त : " तसेंची वर्तूं यत्न म्यां सदा
केला आबाल्य. "जसें अन्य तुझ्याशीं
वागावें म्हणुनि तुला वाटतें तसें
तूंहि वाग अन्याशीं " संतवचन हें
मी अनुपलिं पालाया कष्टलों. अणी
जरि आपद्धर्म सेव्य मानिले तरी
ते इतुक्यास्तवची कीं धर्मची स्वयें
ओपुनि दे आपत्तीच्याचि मज करीं !
जैं हिरव्या गवताच्या गार गालिच्या-
वरुनि दहा पावलींच अंगणांमधें
कारागारांत कधीं मी फिरे, तधीं
आत्मौपम्यांत मुरत चित्त थिजोनी
कितिदा तरी चरण अकस्मात चालतां
स्तंभित होऊनि रहावेत घटिघटी

न विद्यते तथापि किमपि मे भयम्, यतः
यदेव इह जन्मनि उप्तं भवति बीजम्
तदेव अमुत्र धारयते अनुरूपं पुष्पफलभरम्
" इति शुश्रुम धीराणां ये नस्तद् विचचक्षिरे ".
कृतश्च मया प्रयासः तानि तानि बीजानि वप्तुम्
यानि यानि तैरेव प्रशस्ततमत्वेन वितीर्णानि
फलाशानिरपेक्षतया वप्तुम्.

" तव वर्त्मानुवर्त्स्यन्ते समानायां स्थितौ जनाः ।
अतो लोकोन्नतेर्घातो यथा न स्यात् तथा कुरु ॥ "

तथैव वर्तितुं यतितं मया शैशवात् प्रभृति.

" अन्येषां यादृशीं वृत्तिम् आत्मनि त्वम् अपेक्षसे ।
तद्वदेव त्वया चापि वर्तितव्यं जनान् प्रति ॥ "

प्रतिक्षणं मया आयस्तम्, ' सन्त'-वचनस्यास्य परिपालने
यच्च आचरिताः आपद्धर्माः
एतदर्थमेव तद्, यद्
धर्म एव निक्षिप्तवान् करे मे तादृशान् आपद्धर्मान्.

यदि कदाचित् कारागारस्य अङ्गने इतस्ततः परिक्रमामि
मृदुलकोमले शाद्वलतले,
आत्मौपम्ये विलीनं भवति तदा चित्तम्;
सहसैव भवति अनेकशो निस्पन्दं चरणद्वयम्
पदात् पदमपि अग्रतः अनीहमानं गन्तुम्

काहीं केल्याहि तया तरुण कोवळ्या
गवताचे अंकुर दुखतील या भयें
पाय त्यावरी नये पडूंचि कीं पुढें,
हातीचा घास कधीं हटुनि रहावा
हातींचीं, कीं जितुकीं त्यांत शितें तीं
बीजेंची नव्हत काय ? खातसों अम्हीं
फळ तें तें भ्रूणघात ? आणि कधिंकधीं
मज पडलें भय कीं मज वेड लागलें !
आत्मौपम्यास जई वर्तण्यांत हें
मन माझें अनुसरतां मज पदोपदीं
मरणासम दुःख होय पाहुनी जगीं
पूर्ण असंभवचि; तया आचरूं पुरें
तरिहि यत्न म्यां केला; अज्ञतेमुळें
वा अशक्यतेमुळेंच पद कधीं जरी
स्खलित जाहलें असेल तरि असेल तें.
म्हणुनि भय उद्यांहि ना. स्मशानभूमिचा
परतटप्रदेश जो अनोळखी तिथें
सुखकर प्रवास करवि जें असें असे
ओळखिचें पत्र अम्हांजवळ त्या स्वयें
भगवान् श्रीकृष्णाचें—श्रीमतां गृहे
शुचीनां च ! वा गेहे योगिनामपि ! !
' कश्चित् कल्याणकृच्च तात दुर्गतिम्
नहि गच्छति ' ! नहि गच्छति सांगती अणी
ते निरीश्वर-स्वभाव-वादिही मला,

बालतृणानां पीडनभयात्.
पाणिस्थश्च कवलः पाणौ एव तिष्ठति
प्रतिपुलाकं बीजशङ्कया;
व्यथयति च भ्रूणघातशङ्का प्रति-फलभक्षणम्
उन्मत्तो वाहं संवृत्तः इति च स्वयमेव पृच्छामि भयशङ्कितः.
आत्मौपम्यस्य अनुष्ठानाय प्रवृत्ते मम मनसि
पदे पदे मया अनुभूतं मरणनिर्विशेषं दुःखम्
पूर्णतायाः असंभवात्;
तथापि मया प्रयतितं तत् कात्स्न्येंन अनुष्ठातुम्;
यत् किंचित् च तत्र स्खलनम्
तद् अज्ञानाद् वा, असामर्थ्याद् वा
—यदि स्यादेव किमपि स्खलनम्—
अत एव न विद्यते मम अनागतदिन-भयम्
एहि, मृत्यो ! एहि. सुखेनैव एहि ।
वर्तते च मत्समीपे परिचायकं पत्रम्
साक्षाद् भगवता दत्तम्
सर्वमेव प्रवासं यत् सुखावहं संपादयेत्
श्मशानभूमेः परतटवर्तिनि अज्ञातेऽपि प्रदेशे—

“ नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति । ”

“ शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।
अथ वा योगिनामेव कुले भवति धीमताम् । ”

एवमेव आहुः निरीश्वरवादिनः
ये च स्वभाववादिनः
‘ न नश्यति कल्याणकृत्;’ अतश्च

म्हणुनि जरी सत्यचि जें वदति ते, जरी
स्वर्ग, नरक, जन्मांतर, बंध, मुक्ति वा
निजकर्माचाची परिपाक कीं तरी
मरणाची वेस जयामाजि उघडते
त्या अदृष्ट नगरांतिल अति सुरम्य ते
राखवूनि ठेवियले असति बंगले
आर्धींची आम्हांस्तव भरुनिया अम्हीं
कर्माच्या, धर्माच्या नियत विसारा ! [१७०]
परि जरि कीं स्वर्ग, जीव, बंध, कर्म वा
ऐहिक तें इंद्रजाल मात्र, कीं जरी
संघातोत्पन्न भाव मात्र जीव हा
मृत्युपृथक्करणिं अभावांत ओसरे,
तरि सर्वोत्तमचि ! मरण एक सुषुप्ति
अथवा प्रत्यक्ष मुक्ति ! पंचही असे
मिश्रित भूतांश पृथक् मुक्त होउनी
विहरोत स्वेच्छ नव्या मिश्रणांतुनी,
वा स्वयेंचि, वा शून्यीं ! इंद्रधनु तसें
संध्येच्या आकाशीं विपल शोभुनी [१८०]
विपलांतचि हा माझा 'मी' हि कीं जरी
विश्वाच्या अंतर्हित ' मीं 'त मावळे
तरि मरणा ! मरण न तूं ! मरण मुक्तिची
—विपलांतचि परि ! विनंति इतुकिची असे
येणें तरि येउनि जा झटकनी. तुझा
दुर्लौकिक जो जगांत, लोक जो तुझा

अवितथं चेत् तद्वचनम्,
स्वर्गो वा नरको वा
बन्धो वा मोक्षो वा
स्वकर्मणः परिपाकमात्रं चेद् देहान्तरप्राप्तिर् वा,
तर्हि मरण-महाद्वार-प्रवेश्ये अस्मिन् अदृष्टपूर्वे नगरे
प्रागेव स्वायत्तीकृताः अस्माभिः रमणीयतराः प्रासादाः
वितरणेन नियत-पूर्वदेयस्य
—कर्मानुष्ठानस्य, धर्माचरणस्य.
यदि तु सर्वमेव इदं केवलम् ऐहिकं इन्द्रजालम् एकम्
स्वर्गो वा जीवो या बन्धो वा कर्म वा,
यदि च संघातोत्पन्नो भावमात्रोऽयं जीवः
पृथक्-कृते च मृत्युना संघाते पुनरपि विगलति अभावे
शोभनतमं तर्हि!
मरणं मरणं नाम तदा केवलम् एका सुषुप्तिः
साक्षाद् वा मुक्तिः;
पश्चापि तर्हि संघातघटकाः महाभूतानाम् अंशाः
कामं विहरन्तु स्वैरं पुनरपि पृथग् भूत्वा
समस्ता वा नूतनसंघातरूपेण, व्यस्ता वा स्वयमेव,
विलीना वा शून्ये.
–क्षणमात्रं चेत् संज्ञाकाशे इन्द्रचापवद् विद्योत्य
क्षणान्तरे मे विलीयेत विश्वात्मनि जीवात्मा,
अमृत्युस् त्वं तर्हि मृत्यो! ननु मुक्तिरेव असि,
क्षणेनैव यदि तु विलयः.
इयमेव इदानीं वर्तते केवलं मे प्रार्थना
क्षिप्रमेव एहि–यदि आगन्तुम् इच्छसि.
अकीर्तिर् या ते लोके, द्वेषो वा त्वदुपरि

द्वेष करिति, तो नचि कीं असिस तूं स्वत:
निर्दय वा निंद्य म्हणुनि–पाहुनी तुला
आलाची कोणीही परत कीं न तो
सांगूं तूं केंवी ते ! परि विशेषत:
मृत्यो ! तूं अप्रियसा जगति जें तुझें
सैन्य, पुरस्सर, पीडक, हें हिडिस्ससें,
रोगांचें क्रूर असे त्यामुळेंच कीं.
मीच न कीं परि अजातशत्रु जो जगीं
तुल्य ज्या प्रियाप्रियादि हानि-लाभ, त्या
भगवान् श्रीगौतमाप्रतीहि भासला
रोग जरा अप्रियचीः "लाभ ना दुजा
आरोग्यासम जगतीं", धर्मपद वदे
तरिही जे कोणीं तुज नुघडतीलची
स्वेच्छेनें दरवाजे, दुर्ग ते हठी
जिंकुं जीवनाचे तूं धाड धाडही
रोगांच्या फौजांची गांजत्या तिथें.
मी तों जीं नुघडतील फोडिलीं तरी
जाणारचि, तीं दारें उघडुनी स्वयें
या माझ्या गेहाचीं, स्वागता असे
अनिवार्यां सिद्ध तुझ्या ! म्हणूनि शक्य कीं
ये तरि, हे अखिल-वीर-वीर विजेत्या !
एकलाचि, अपुरस्सर, आणि अकस्मात्.
परि अशक्य जरि तें तुज एकटें तसें
येणेंची, तरि त्याही क्रूर पीडका

न तत्र तव निर्दयत्वं निन्द्यत्वं वा हेतुः
--को वा तव जानाति वास्तविकं रूपम्?
को वा एकवारं त्वां साक्षात्कृत्य स्वयम्
पुनरागतो वर्णयितुम् : एवंरूपो मृत्युः, एवंगुणविशिष्टः?--
यत्तु तवेदं सैन्यं, ये च तव अग्रदूताः
घृणावहा निर्दयाः पीडयन्तो रोगाः
तेनैव यातोऽसि त्वं द्वेष्यभावं जनानाम्
न केवलं मम
अजातशत्रोर् भगवतो गौतमस्याप्यासीद् अप्रिय इव रोगः
तुल्य-प्रियाप्रियस्य तुल्य-लाभालाभस्य
येन वदति धर्मपदम् :
'न ह्यारोग्यसमो लाभः'
यदि केचित् तथापि नोद्घाटयिष्यन्ति स्वेच्छया
निजानि द्वाराणि तव कृते
कामं विसृज तत्र तव क्रूरतराणि रोगसैन्यानि
जीवितदुर्गास् तेषां दुर्हठान् विजेतुम्
अहं तावत् प्रागेव सिद्धोऽस्मि तव स्वागताय
अपरिहार्याय अवर्जनीयाय

अपावृत्य सर्वाणि देहगेहस्य द्वाराणि
उद्घाटनविमुखानि चेद् यानि प्रसह्य भङ्क्त्वा उद्घाटयिष्यन्ते!
अत एव, यदि शक्यम्, एहि अपुरःसरः,
एकाकी, अनपेक्षितः
हे विजित-निखिल-वीर-धुरंधर!
यदि तु अशक्यं मन्यसे तथा एकाकित्वेन आगन्तुम्
कामम् एहि तर्हि निज-क्रूर-रोग-परिवार-सहितम्

रोगांच्या सैन्याचा क्षोभ सोसण्या
मी असेंचि सिद्ध. आजि दोन वत्सरें
पाहतची अससी तूं मजसि हा असा
शरपंजरिं खिळला ! ज्या मधुर लागलें
जीवनांतलें मधु, प्रकाश चक्षुतें,
प्रीति हृदा, तो मी त्या सर्व सुखांचें
मूल्य म्हणुनि मृत्यूच्या यातनाहि कीं
समजुनि कर्तव्य सहूं सिद्ध असेंची !

अंदमान, १९२१

---

सिद्धोऽस्मि सर्वथा तस्य पीडनभरं सोढुम्
ननु पश्यस्येव मां शरपञ्जरकीलितं गतसंवत्सर-द्वयम्
यस्य मम मनसा सानन्दम् अभिनन्दितं जीवनमधु,
चक्षुर्भ्यां प्रकाशः, हृदयेन प्रीतिः
सज्जोऽस्मि सोऽहं मृत्युवेदनाम् अवश्यसहनीयतया सोढुम्
आस्वादितपूर्वस्य सुखस्य तं निष्क्रयं मन्यमानः।

---

# १२. जगन्नाथाचा रथोत्सव



ऐश्वर्यें भारी ! या अशा । ऐश्वर्यें भारी
महाराज ! आपुली कथा ना कुठें निघे स्वारी ? ॥ ध्रु. ॥
दिक्-क्षितिजांचा दैदीप्य रथ तुझा सुटता
ह्या कालपथाच्या अतुट उतरणीवरता
नक्षत्रकणांचा उठे धुराळा परता
युग-क्रोश दूरी । मागुती । युग-क्रोश दूरी
महाराज ! आपुली कथा ना कुठें निघे स्वारी ? [ १ ]
पुसूं नयेचि परी । पुसतसें । पुसूं नयेचि परी
मिरवणूक ही किमर्थ अथवा कुठें निघे सारी
दुज्या कुण्या द्वारीं । जावया । दुज्या कुण्या द्वारीं
किंवा केवळ मिरवित येऊं परत निजागारीं
या सूर्यशतांच्या किती मशाली जळती
मधुनींच शतावधि चंद्रज्योति ह्या उडती
सरसरत बाण हे धूमकेतुचे सुटती

# १२. जगन्नाथस्य रथोत्सवः

[ जगन्नाथपुरी इत्यत्र प्रतिवर्षं रथोत्सवो भवति। जगद्यात्रायाः प्रतीकमिव जगन्नाथ-रथयात्रां संभाव्य कविना कवितेयं विरचिता। संयोजितगत्यश्वं दिङ्मण्डल-रथम् आरूढः सूर्यचन्द्र-दीपिकासहस्र-प्रज्वालितमार्गः चूर्णितनक्षत्रकणानां धूलिम् उत्थापयन् अखण्डकाल-मार्गेण कुत्र प्रस्थितोऽस्ति जगन्नियन्ता जगन्नाथः इति सविस्मयं पृच्छ्यते अत्र। ]

महता वैभवेनैवं महद्धर्या च युता प्रभो।
जगन्नाथ, महाराज! यात्रा क्व प्रस्थिता तव ॥

यदा वै ते दीप्यमानो रथोऽयं
दिक्चक्रात्मा कालपथेन निम्नम्।
दूरं वेगाद् याति, धूलिस् तदानीं
नक्षत्राणां चूर्णितानाम् उदेति ॥

युगानि क्रोशभूतानि अवहीनानि दूरतः
महाराज! समाचक्ष्व यात्रा क्व प्रस्थिता तव ॥ [ १ ]

प्रष्टव्यं नैव यत्सत्यं पृच्छामि तु कुतूहलात्।
कुत्र गच्छति यात्रेयं केन वा हेतुना प्रभो ॥
अप्यन्यत् तोरणद्वारं गन्तव्यं यात्रयाऽनया।
संचारः सोत्सवो मार्गे ' पुनरागमनाय ' वा ॥

स्थाने स्थाने पुरतस्ते रथस्य
संदृश्यन्ते सूर्य-सहस्र-दीपिकाः।
' चन्द्र-ज्योतिः ' शतशतशः प्रदीप्तं
सूत्कुर्वन्तो धूमकेत्वग्निवाणाः ॥

कितिदा आणि तरी । हीहि तैं । कितिदां आणि तरी
उठे चमकुनी रात्रि पुरातन तिच्या अंधकारीं [ २ ]

जीवाचीच किती । कथा या । जीवाचीच किती
रथासी जगन्नाथ ! तुझ्या या ओढूं जे झटती
ज्वालामुखिपङ्क्ती–। पासुनी । ज्वालामुखिपङ्क्ती–
मज्जापिण्डापर्यन्त प्रस्फुटिता जी जगतीं
उंचनिंच पाठीं । पुढति वा । उंचनिंच पाठीं
गति तितुकी तव रथा झटतसे ओढायासाठीं
इच्छांत आणि या भूतमात्र-वेगांच्या
ओंवून लगामा तुझ्या परम-इच्छेच्या
त्या अतुट उतरणीवरती हो काळाच्या
खेळत हा अतलीं । रथोत्सव । खेळत हा अतलीं
महाराज ! आपुली कथा ना कुठें निघे स्वारी ?

अंदमान

तमोगूळ्हा महारात्रिर् द्योतमाना पुनः पुनः ।
निमज्जति पुनस्तत्र विद्युद् अभ्रघनेष्विव ॥ [२]

आ ब्रह्मस्तम्बपर्यन्ता अनन्ता जीवकोटयः ।
सर्वशक्त्या घटन्ते तास् तव वोढुं महारथम् ॥
आ महागिरि-पङ्क्तिभ्यो या वमन्त्यनलं मुखात् ।
या मज्जापिण्डपर्यन्तं जगति स्फुटिता गतिः ॥
अण्वी वा महती वाऽस्तु पुरतः पृष्ठतोऽथ वा ।
या या हि गतिरस्त्यत्र सा सा कर्षति ते रथम् ॥
भूते भूते त्वद्रथस्याश्वभूते
या जीवेच्छा रथवेगस्य हेतुः ।
बलीयसी ईश्वरेच्छाऽस्ति रश्मिस्
तत्र प्रोतो गतिमात्रं नियन्ता ॥
कालमार्गेऽतलेऽखण्डे क्रीडन् याति रथस् तव ।
महाराज समाचक्ष्व यात्रा क्व प्रस्थिता तव [३]

# १. “ वीराय तस्मै नमः ”

आङ्ग्लं देशमगान्नवे वयसि यो विद्यार्जनस्य च्छलात्
चक्रे संघटितांश्च तत्र वसतो यो भारतीयाञ्जनान् ।
शस्त्राणां चयनं तथा निजभुवे संप्रेषणं छद्मना
यः संपादितवान् कुशाग्रधिषणो वीराय तस्मै नमः ॥ १ ॥

आङ्ग्लानां नयशालिनां बलवतां मध्ये पुरस्तिष्ठता
तेषामेव च विच्छिदे रचयता कान्तेर्महद् व्यूहनम् ।
नूनं येन गुहां प्रविश्य अभयं भारः सटाया महान्
आकृष्टः प्रसभं सुखासितहरेर्वीराय तस्मै नमः ॥ २ ॥

त्रैलोक्यप्रथितां प्लुतिं बलवतीं को नाम तां विस्मरेत्
नक्रग्राहभयंकरे गुरुतरेऽपारे महासागरे ।
या विश्वं निखिलं सकौतुक-महाश्चर्याब्धि-मध्येऽक्षिपद्
उग्रोदग्रकृति-प्ररूढयशसे वीराय तस्मै नमः ॥ ३ ॥

‘ पञ्चाशच्छरदात्मकं युवक ते निर्वासनं शासनं
राजद्रोहिण ’ इत्यनल्पविषमं श्रुत्वैव यो निर्णयम् ।
तत्कालं समघोषयद् ‘ विजयतां स्वातन्त्र्यलक्ष्मी ’रिति
धीरोदात्तरवेण निर्भयमना वीराय तस्मै नमः ॥ ४ ॥

यन्त्रं पेषणसाधनं भ्रमितवान् यःकोऽपि बन्दीव यः
तैलं यन्त्रमविभ्रमञ्च सततं यो मूर्छनान्तं तथा ।
तन्तुच्छेदमथाकरोदहरहर्यो नारिकेलत्वचः
प्रोद्भिन्नै रुधिरै रजत्करतलो वीराय तस्मै नमः ॥ ५ ॥

स्वातन्त्र्यं समुपागतं, क्व नु पुनः स्वातन्त्र्यवीरस्मृतिः ?
स्वातन्त्र्याप्तिमहोत्सवेऽप्यहह ! तन्नामापि नाश्रूयत ।

किंवा चिन्तनयानया, किममुना साकाङ्क्षमात्मा ऽऽहुतः ?
बुद्ध्या दिव्य-सतीव्रतं श्रितवते वीराय तस्मै नमः ॥ ६ ॥

त्यागी राष्ट्रस्य भक्तो, जनगणहृदयं नर्तयन्नेकवक्ता
द्रष्टा हिन्दुत्वमन्त्रं, शितमतिशरणो रूढिवर्गस्य भङ्क्ता ।
एको नेता नदीष्णः कुटिलनृपनये, काव्यसृष्टेश्च सम्राड्
भाषाशुद्धेः प्रणेता, इति बहुविधताभूषितं तं नमामि ॥ ७ ॥

'हठादाकृष्टानां कतिपयपदानां रचयिता'
इदं वाक्यं नूनं भवति विषये मेऽप्यवितथम् ।
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन् नरवर मतिर्मे व्यवसिता ॥ ८ ॥

---

## २. प्रवहतां संस्कृत-मन्दाकिनी

शत-शत-कोटि-शरत्-पर्यन्तम् ।
प्रवहतां संस्कृतमन्दाकिनी ॥ ध्रु० ॥

अज्ञाता यस्या गङ्गोत्री
इतिहासस्य न यत्रास्ति गतिः
परिणतं फलम् अनादिः श्रुतिः
यत्प्रसवः सा भारतवाणी ॥ १ ॥

सिन्धु-शुतुद्री-सरस्वतीनाम्
तटे ऋषीणां ध्यानपराणाम्
होम-धूम-पावित-लोकानाम्
अत्रिभृगूणां छन्दोवाणी ॥ २ ॥

कस्त्वं कोऽहं प्रश्नपराणाम्
आत्मतत्त्व-दर्शनोत्सुकानाम्

मराठी ... ग्रं. क्र. १००५४ संग्रहालय

अग्रिजा

याज्ञवल्क्यमुनि-जनकादीनाम्
    तत्त्वमसीति ब्रह्मवादिनी ॥ ३ ॥

वाल्मीकिमुनि-व्यासविरचिता
रामकृष्णयोः पावनगाथा
अखण्डदीपो भगवद्गीता
    कर्मयोग-संदेशदायिनी ॥ ४ ॥

मेघदूत-शाकुन्तल-रघुभिः
उत्तरराम-किरात-कुमारैः
कालिदास-भवभूतिप्रमुखैः
    कृतविभूषणा मधुरभाषिणी ॥ ५ ॥

पाणिनिसदृशैः स्तोत्रगायकैः
भोज-मम्मटादिभिर्भूषकैः
शंकरादिभिस्तत्त्वचिन्तकैः
    दत्तवन्दना वाक्सम्राज्ञी ॥ ६ ॥

इयमस्माकं धर्मभारती
राष्ट्रैक्यस्य च महती स्फूर्तिः
विना संस्कृतं नैव संस्कृतिः
    इहामुत्र-कल्याणकारिणी ॥ ७ ॥

पुष्टिं तुष्टिं समावहन्ती
जीवितपुष्पं विकासयन्ती
विश्वमङ्गलं फलं फलन्ती
कोटि-कोटि-शरत्-पर्यन्तम्
प्रवहतां संस्कृतमन्दाकिनी ॥ ८ ॥

---

REFBK-0010054

REFBK-0010054